# समाधिशतकं सटिकम्।

# THE SAMADHI-S'ATAKA.

WITH ENGLISH TRANSLATION.

मूल्यम् रु. ०।

*Price Annas 4.*

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

श्रीप्रभेन्दुविरचितं

# श्रीसमाधिशतकं

## श्रीप्रभाचन्द्रविरचितया टीकयासमेतं

द्विवेद्युपाव्हेन नभुभाईशर्मसूनुना मणिलालशर्मणा

आङ्गलभाषयाविवृतम्

तच्च

श्रीयुतागिरिधरलालवर्मणामाज्ञया

अहमदाबादाख्यपत्तने युनियनाभिधमुद्रालये मुद्रितम्

संवत् १९५१, खिस्ताब्दाः १८९५

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथ श्री

# समाधिशतकं सटीकम् ॥

येनात्माऽबुध्यतात्मैव परत्वेनैव चापरम्
अक्षयानन्तबोधाय तस्मै सिद्धात्मने
नमः ॥१॥

सिद्धं जिनेन्द्रमलमप्रतिमप्रबोधं
निर्वाणमार्गममलं विबुधेन्द्रवन्द्यम् ।
संसारसागरसमुत्तरणप्रपोतं
वक्ष्ये समाधिशतकं प्रणिपत्य वीरम् ॥१॥

श्रीमत्पूज्यपादस्वामी मुमुक्षूणां मोक्षोपायं मोक्षस्वरूपं चोपदर्शयितुकामो निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकं फलमभिलषन्निष्टदेवताविशेषं नमस्कुर्वाणो येनात्मेत्याद्याह । अत्र च पूर्वार्धेन मोक्षोपाय उत्तरा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

र्धे न च मोक्षस्वरूपमुपदर्शितम्। सिद्धात्मने सिद्धपरमेष्ठिने। सिद्धः सकलकर्म्मविप्रमुक्तः स चासावात्मा च तस्मै नमः। येन किं कृतम्। अबुध्यत ज्ञातः। कोऽसौ। आत्मा। कथम्। आत्मैव। अयमर्थः येन सिद्धात्मना आत्मैव आत्मत्वेनाबुध्यत न शरीरादिकं कर्म्मोत्पादितसुरनरनारकतिर्यगादिजीवपर्यायादिकं वा। तथा परत्वेनैव चापरम्। अपरं च शरीरादिकं कर्म्मजनितमनुष्यादिजीवपर्यायादिकं वा। परत्वेनैवात्मनो भेदेनैवाबुध्यत। तस्मै। कथंभूताय। अक्षयानन्तबोधाय। अक्षयोऽविनश्वरोऽनन्तो देशकालानवच्छिन्नसमस्तार्थपरिच्छेदको वा बोधो यस्य तस्मै। एवं विधबोधस्य चानन्तदर्शनसुखवीर्यैरविनाभावित्वसामर्थ्यादनन्तचतुष्टयरूपायेति गम्यते।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ननु चेष्टदेवताविशेषस्य पञ्चपरमेष्ठिरूपत्वा-
दत्र सिद्धात्मन एव कस्माद्ग्रन्थकृता न-
मस्कारः कृत इति चेत्। ग्रन्थस्य कर्तुर्व्या-
ख्यातुः श्रोतुस्तदर्थानुष्ठातुश्च सिद्धस्वरूप
प्राप्त्यर्थित्वात्। यो हि यत्स्वरूपप्राप्त्यर्थी (स
तत्स्वरूपवन्तं प्रार्थयति धनुर्विद्याप्राप्त्यर्थी)
धनुर्वेदविदं नमस्करोति। सिद्धस्वरूपप्रा-
प्त्यर्थी च समाधिशतकशास्त्रस्य कर्ता व्या-
ख्याता श्रोता तदर्थानुष्ठाता चात्मविशेष-
स्तस्मात्सिद्धात्मानं नमस्करोति। सिद्धश-
ब्देनैव चार्हदादीनामपि ग्रहणम्। तेषामपि
देशतः सिद्धस्वरूपोपेतत्वात् ॥१॥

जयन्ति यस्यावदतोऽपि भारती-
विभूतयस्तीर्थकृतोऽप्यनीहितुः ॥
शिवाय धात्रे सुगताय विष्णवे
जिनाय तस्मै सकलात्मने नमः ॥२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथोक्तप्रकारसिद्धस्वरूपस्य तत्प्राप्त्युपायस्य चोपदेष्टारं सकलात्मानमिष्टदेवताविशेषं स्तोतुमाह। जयन्तीति। यस्य भगवतो जयन्ति सर्वोत्कर्षेण वर्तन्ते। काः। भारतीविभूतयः भारत्याः वाण्याः विभूतयोऽबाधितसर्वात्मतत्त्वादिसम्पदः। कथंभूतस्यापि ता जयन्ति। अवदतोऽपि ताल्वोष्ठपुटव्यापारेण वचनमनुच्चारयतोऽपि। उक्तं च। यत्सर्वात्महितं न वर्णसहितं न स्पन्दितौष्ठद्वयं नो वाञ्छाकलितं न दोषमलिनं न श्वासरुद्धक्रमम्। शान्तामर्षविषैः समं पशुगणैराकर्णितं कर्णिभिस्तन्नः सर्वविदः प्रनष्टविपदः पायादपूर्वं वचः। अथवा भारती च विभूतयश्च छत्रत्रयादयः[१]। पुनरपि कथंभूतस्य। तीर्थकृतोऽप्यनीहितुः

१ चामरादयः (?)

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ईहा हि वाञ्छा मोहनीयकर्म्मकार्या । भ-
वति च तत्कर्म्मणः प्रक्षयात्तस्याः सद्भावा-
नुपपत्तिः । अतः अनीहितुरपि तत्करणेच्छा-
रहितस्यापि तीर्थकृतः संसारसमुद्रोत्तरणहे-
तुभूतत्वात्तीर्थमिव तीर्थमागमः तत्कृतवतः।
किं नाम्ने तस्मै । सकलात्मने। शिवाय शिवं
परमसौख्यं परमकल्याणं निर्वाणं चो-
च्यते तत्प्राप्ताय । धात्रे ऋष्यादिभिः सन्मा-
र्गोपदेशकत्वेन च सकललोकाभ्युद्धारकाय ।
सुगताय शोभनं गतं ज्ञानं यस्यासौ सुगतः।
सुष्ठु वाऽपुनरावृत्त्यतिगतं संपूर्णं वा अन-
न्तचतुष्टयं गतः प्राप्तः सुगतस्तस्मै । विष्णवे
केवलज्ञानेनाशेषवस्तुव्यापकाय । जिनाय
अनेकभवगहनव्यसनप्रापणहेतुकर्म्मारातीन्
जयतीति जिनस्तस्मै । सकलात्मने सह
कलया शरीरेण वर्त्तत इति सकलः स चा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सावात्मा च तस्मै नमः ॥ २ ॥

श्रुतेन लिङ्गेन यथात्मशक्ति
समाहितान्तःकरणेन सम्यक् ॥
समीक्ष्य कैवल्यसुखस्पृहाणां
विविक्तमात्मानमथाभिधास्ये ॥३॥

ननु निष्कलेतररूपमात्मानं नत्वा भवान्किं करिष्यतीत्याह । श्रुतेनेति । अथेष्टदेवतानमस्कारकरणानन्तरं अभिधास्ये कथयिष्ये किम् । विविक्तमात्मानं कर्म्ममलरहितं जीवस्वरूपम् । कथमभिधास्ये । यथात्मशक्ति आत्मशक्तेरनतिक्रमणेन । किं कृत्वा । समीक्ष्य तथाभूतमात्मानं सम्यक् ज्ञात्वा । केन । श्रुतेन । एको मे सस्सदो अप्पाणाणदंसणलक्खणो । सेसा मे बाहिराभा वासव्वे संजोगलक्खणेत्याद्या-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गमेन। तथा लिङ्गेन हेतुना । तथाहि । शरीरादेरात्मा भिन्नो भिन्नलक्षणलक्षितत्वात् । ययोर्भिन्नलक्षणलक्षितत्वं तयोर्भेदो यथा जलानलयोः। भिन्नलक्षणलक्षितत्वं चात्मशरीरयोरिति । न चानयोर्भिन्नलक्षणलक्षितत्वमप्रसिद्धम्। आत्मन उपयोगस्वरूपोपलक्षितत्वात् । शरीरादेस्तद्विपरीतस्वभावत्वात्। समाहितान्तःकरणेन समाहितमेकाग्रीभूतं तच्च तदन्तःकरणं च मनस्तेन सम्यक् समीक्ष्य सम्यक् ज्ञात्वाऽनुभूयेत्यर्थः। केषां तथाभूतमात्मानमभिधास्ये। कैवल्यसुखस्पृहाणां कैवल्ये सकलकर्मरहितत्वे सति सुखं तत्र स्पृहा अभिलाषो येषां। कैवल्ये विषयाप्रभवे वा सुखे। कैवल्यसुखयोर्वा केवलज्ञानसुखयोः सस्पृहा ये तेषाम् ॥ ३ ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

बहिरन्तःपरश्चेति त्रिधाऽत्मा सर्वदेहिषु।
उपेयात्तत्र परमं मध्योपायाद्बहिस्त्यजेत् ४

कतिभेदः पुनरात्मा भवति येन विविक्तमात्मानमिति विशेष्योच्यत इत्याशङ्क्याह। बहिरिति। बहिरात्मा। अन्तः अन्तरात्मा। परश्च परमात्मा। इत्येवं त्रिधाऽत्मा त्रिप्रकार आत्मा। क्व। सर्वदेहिषु सकलप्राणिषु। ननु अभव्येषु बहिरात्मन एव संभवात् कथं सर्वदेहिषु त्रिधाऽत्मा स्यादित्यप्यनुपपन्नम्। तत्रापि द्रव्यरूपतया त्रिविधात्मसद्भावोपपत्तेः। कथमन्यथा तत्र पञ्चज्ञानावरणान्युपपद्यन्ते। केवलज्ञानाद्याविर्भावसामग्री हि तत्र कदाचिदपि न भविष्यतीत्यभव्यत्वम्। न पुनस्तद्योग्यद्रव्यस्याभावादिति। भव्यस्यापेक्षया वा सर्वदेहिग्रहणम्। आसन्नदूरदूरतरभव्येषु भव्यसमा-

नाभव्येषु च सर्वेषु त्रिधाऽत्मा विद्यत इति।
तर्हि सर्वज्ञे परमात्मन एव सद्भावाद्बहि-
रन्तरात्मनोरभावात्त्रिधात्मनो विरोध इत्य
प्ययुक्तम्। भूतप्रज्ञापननयापेक्षया तत्र तद्वि
रोधासिद्धेः। घृतघटवत्। यो हि सर्वज्ञाव-
स्थायां परः परात्मा संपन्नः स पूर्वं बहिरा-
त्मा अन्तरात्मा चासीदिति घृटघटवद-
न्तरात्मनोऽपि बहिरात्मत्वं परमात्मत्वं
च भूतभाविप्रज्ञापननयापेक्षया द्रष्टव्यम्।
तत्र कुतः कस्योपादानं कस्य वा त्यागः क-
र्तव्य इत्याह। उपेयादित्यादि। तत्र तेषु त्रि-
धात्मसु मध्ये उपेयात् स्वीकुर्यात्। परमं
परमात्मानम्। कस्मान्मध्योपायान्मध्योऽ-
न्तरात्मा स एवोपायस्तस्मात्। तथा बहिः
बहिरात्मानं मध्योपायादेव त्यजेत् ॥ ४ ॥

बहिरात्मा शरीरादौ

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जातात्मभ्रान्तिरान्तरः ।
चित्तदोषात्मविभ्रान्तिः
परमात्माऽतिनिर्मलः ॥५॥

तत्र बहिरन्तः परमात्मनां प्रत्येकं लक्षणमाह । बहिरात्मेति । शरीरादौ शरीरे । आदिशब्दाद्वाङ्मनसोरेवग्रहणम् । तत्र जाता आत्मेति भ्रान्तिर्यस्य स बहिरात्मा भवति । आन्तरः अन्तर्भवः । तत्र भवइत्यणुक्तेर्भमात्रे टिलोपमित्यस्य नित्यत्वं येषां च छेषः शाश्वतिक इतिनिर्देशात् । अन्तरे वा भव आन्तरः अन्तरात्मा । स कथंभूतो भवति । चित्तदोषात्मविभ्रान्तिः । चित्तं च विकल्पः दोषाश्च रागादयः आत्मा च शुद्धं चेतनाद्रव्यं तेषु विगता विनष्टा भ्रान्तिर्यस्य । चित्तं चित्तत्वेन बुध्यते दोषाँश्च दोषत्वेन आत्मानमात्मत्वेनेत्यर्थः । चित्तदोषेषु

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वा विगत आत्मेति भ्रान्तिर्यस्य। परमात्मा भवति किं विशिष्टः। अतिनिर्म्मलः प्रक्षीणाशेषकर्म्मम्मलः ॥ ५ ॥

निर्म्मलः केवलः शुद्धो
विविक्तः प्रभुरव्ययः।
परमेष्ठी परात्मेति
परमात्मेश्वरो जिनः ॥६॥

तद्वाचिकां नाममालां दर्शयन्नाह। निर्म्मलइति। निर्म्मलः कर्म्ममलरहितः। केवलः शरीरादीनां सम्बन्धरहितः। शुद्धः द्रव्यभावकर्म्मणामभावात् परमविशुद्धिसमन्वितः। विविक्तः शरीरकर्म्मादिभिरसंस्पृष्टः। प्रभुरिन्द्रादीनां स्वामी। अव्ययः लब्धानन्तचतुष्टयस्वरूपादप्रच्युतः। परमेष्ठी परमेन्द्रादिवन्द्ये पदे तिष्ठतीति परमे-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ष्ठी स्थानशीलः । परात्मा संसारिजीवेभ्य उत्कृष्ट आत्मा। इति शब्दः प्रकारार्थे। एवं प्रकारा ये शब्दास्ते परमात्मनो वाचकाः। परमात्मेत्यादिना तानेव दर्शयति।परमात्मा सकलप्राणिभ्य उत्तम आत्मा। ईश्वर इन्द्रायसंभविनाऽन्तरङ्गबहिरङ्गेण परमैश्वर्येण सदैव संपन्नः।जिनः सकलकर्म्मोन्मूलकः।६।

बहिरात्मेन्द्रियद्वारै-
रात्मज्ञानपराङ्मुखः ।
स्फुरितः स्वात्मनोदेह-
मात्मत्वेनाध्यवस्यति ॥ ७ ॥

इदानीं बहिरात्मनो देहस्यात्मत्वेनाध्यवसाये कारणमुपदर्शयन्नाह । बहिरिति । इन्द्रियद्वारैः इन्द्रियमुखैः कृत्वा स्फुरितो बहिरर्थग्रहणे व्यापृतः सन् बहिरात्मा मूढा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

त्मा आत्मज्ञानपराङ्मुखः जीवस्वरूपपरिज्ञानाद्बहिर्भूतो भवति । तथाभूतश्च सन्नसौ किं करोति । स्वात्मनो देहमात्मत्वेनाध्यवस्यति आत्मीयशरीरमेवाहमितिप्रतिपद्यते ॥ ७ ॥

नरदेहस्थमात्मान-
मविद्वान्मन्यते नरम् ।
तिर्यञ्चं तिर्यगङ्गस्थं
सुराङ्गस्थं सुरं तथा ॥८॥

तद्य प्रतिपद्यमानो मनुष्यादिचतुर्गतिसम्बन्धिशरीरभेदेन प्रतिपद्यते ।तत्र नरस्यदेहः नरदेहः तत्र तिष्ठतीति तत्स्थस्तमात्मानं नरं मन्यते । कोऽसौ । अविद्वान् । बहिरात्मा तिर्यञ्चमात्मानं मन्यते । कथंभूतम् । तिर्यगङ्गस्थं तिरश्चामङ्गं तिर्यगङ्गं तत्र

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तिष्ठतीति तिर्यगङ्गस्थस्तम् । सुराङ्गस्थमात्मानं सुरं तथा मन्यते ॥ ८ ॥

नारकं नारकाङ्गस्थं
न स्वयं तत्त्वतस्तथा ।
अनन्तानन्तधीशक्तिः
स्वसंवेद्योऽचलस्थितिः ॥९॥

नारकमिति । नारकमात्मानं मन्यते । किं विशिष्टम् । नारकाङ्गस्थं । न स्वयं तथा । नरादिरूप आत्मा स्वयं कर्म्मोपाधिमन्तरेण न भवति । कथं । तत्त्वतः परमार्थतो न भवति । व्यवहारेण तु यदि भवति तदा भवतु । कर्म्मोपाधिकृता हि जीवस्य मनुष्यादि पर्यायास्तन्निवृत्तौ निवर्त्तमानत्वान्न पुनर्वास्तवा इत्यर्थः । परमार्थतस्तर्हि कीदृशोऽसावित्याह । अनन्तानन्तधीश-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

क्तिः धीश्च शक्तिश्च धीशक्ती अनन्तानन्ते धीशक्ती यस्य तथाभूतोऽसौ । कुतः परि च्छेद्यइत्याह । स्वसंवेद्यः। निरुपाधिकं हि रूपं वस्तुनः स्वभावोऽभिधीयते। कर्म्माद्यपाये चानन्तानन्तधीशक्तिपरिणत आत्मा स्वसंवेदनेन वेद्यस्तद्विपरीतपरिणत्यनुभवस्य संसारावस्थायां कर्म्मोपाधिविनिर्म्मितत्वात् । अस्तु नांम तथा स्वसंवेद्यः कियत्काल मसौ नतु सर्वदापश्चात्तद्रूपविनाशादित्याह। अचलस्थितिः । अनन्तानन्तधीशक्तिस्वभावेनाचलास्थितिर्यस्य । यैः पुनर्योगसांख्यैः मुक्तौ तत्प्रच्युतिरात्मनोऽभ्युपगता ते प्रमेयकमलमार्तण्डे न्यायकुमुदचन्द्रे च मोक्षविचारे विस्तरतः प्रत्याख्याताः ॥ ए ॥

स्वदेहसदृशं दृष्ट्वा
परदेहमचेतनम् ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

परात्माधिष्ठितं मूढः
परत्वेनाध्यवस्यति ॥१०॥

स्वदेह एवमध्यवसायं कुर्वाणो बहिरात्मा परदेहे कथं करोतीत्याह। स्वेति। स्वदेहसदृशं परदेहं दृष्ट्वा। कथंभूतं। परात्माधिष्ठितं कर्म्मवशात् स्वीकृतमचेतनं चेतनमपि संगतं मूढः बहिरात्मा परत्वेनापरात्मत्वेनाध्यवस्यति ॥ १० ॥

स्वपराध्यवसायेन
देहेष्वविदितात्मनाम्।
वर्तते विभ्रमः पुंसां
पुत्रभार्यादिगोचरः ॥ ११ ॥

एवंविधाध्यवसायात्किं करोतीत्याह। स्वपरेति। विभ्रमो विपर्यासः पुंसां वर्तते। किं विशिष्टानां। अविदितात्मना अपरि-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ज्ञातात्मस्वरूपाणाम् । केन कृत्वाऽसौ वर्तते । स्वपराध्यवसायेन । क्व । देहेषु । कथंभूतो विभ्रमः । पुत्रभार्यादिगोचरः । परमार्थतोऽनात्मीयमपकारकमपि पुत्रभार्याधनधान्यादिकमात्मीयमुपकारकं च मन्यते। तत्सम्पत्तौ सन्तोषं तद्वियोगे च महासन्तापमात्मवधादिकं च करोतीति ॥११॥

अविद्यासंज्ञितस्तस्मा-
त्संस्कारो जायते दृढः ।
येन लोकोऽङ्गमेव स्वं
पुनरप्यभिमन्यते ॥ १२ ॥

एवंविधविभ्रमाच्च किं भवतीत्याह । अविद्येति । तस्मात्तद्विभ्रमाद्बहिरात्मनि संस्कारो वासनादृढोऽविचलो जायते । किं नाम । अविद्यासंज्ञितः अविद्या संज्ञाऽस्य

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सञ्जातेति तारकादिभ्यइतच्। येन संस्कारेण कृत्वा लोकः अविवेकिजनः अङ्गमेव शरीरमेव स्वमात्मानं पुनरपि जन्मान्तरेऽप्यभिमन्यते ॥१२॥

देहे स्वबुद्धिरात्मानं
युनक्त्येतेन निश्चयात् ।
स्वात्मन्येवात्मधीस्तस्मा
द्वियोजयतिदेहिनम् ॥ १३ ॥

एवं मन्यमानश्चासौ किं करोतीत्याह । देहइति । देहे स्वबुद्धिः आत्मबुद्धिर्बहिरात्मा किं करोति। आत्मानं युनक्ति सम्बद्धं करोति । दीर्घसंसारिणं करोतीत्यर्थः । केन। एतेन देहेन। निश्चयात् परमार्थेन । स्वात्मन्येवजीवस्वरूप एव आत्मधीरन्तरात्मा तस्मात् निश्चयात् वियोजयति

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

असम्बद्धं करोति ॥१३॥

देहेष्वात्मधिया जाताः
पुत्रभार्यादिकल्पनाः ।
सम्पत्तिमात्मनस्ताभि
र्मन्यते हा हतं जगत् ॥१४॥

देहेनात्मानं योजयतश्च बहिरात्मनो दुर्विलसितोपदर्शनपूर्वकमाचार्योऽनुशयं कुर्वन्नाह । देहेष्विति । जाताः प्रवृत्ताः। काः । पुत्रभार्यादिकल्पनाः । क्व । देहेषु । कया । आत्मधिया । क्व आत्मधीः। देहेष्वेव । अयमर्थः पुत्रादिदेहं जीवत्वेन प्रतिपद्यमानस्य मत्पुत्रो भार्येत्यादिकल्पनाविकल्पा जायन्ते ताभिश्चानात्मीयाभिरनुपकारिभिश्च संपत्तिं पुत्रभार्यादिविभूत्यतिशयमात्मनो मन्यते । जगत् कर्तृ । हा हतं नष्टम् । स्व-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्वरूपपरिज्ञानाद्बहिर्भूतं जगत् बहिरात्मा प्राणिगणः ॥ १४ ॥

मूलं संसारदुःखस्य
देह एवात्मधीस्ततः ।
त्यक्त्वैनां प्रविशेदन्त-
र्बहिरव्यावृतेन्द्रियः ॥१५॥

इदानीमुक्तमर्थमुपसंहृत्यान्तरात्मनोऽनुप्रवेशं दर्शयन्नाह । मूलमिति । मूलं कारणम् । कस्य । संसारदुःखस्य । कोऽसौ । देह एव ।आत्मधीः देहः कायः स एव आत्मधीः। यत एवं ततस्तस्मात्कारणात् । एनां देह एवात्मबुद्धिंत्यक्त्वा अन्तः प्रविशेत् । आत्मन्यात्मबुद्धिं कुर्यात् । अन्तरात्मा भवेदित्यर्थः । कथंभूतः सन् । बहिरव्यावृतेन्द्रियः बहिर्बाह्यविषयेष्व व्यावृतान्यप्रवृत्ता-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नीन्द्रियाणि यस्य ॥ १५ ॥

मत्तश्च्युत्वेन्द्रियद्वारैः
पतितो विषयेष्वहम् ।
तान्प्रपद्याहमिति मां
पुरा वेद न तत्त्वतः ॥१६॥

अन्तरात्मा आत्मन्यात्मबुद्धिं कुर्वाणोऽलब्धलाभात्सन्तुष्ट आत्मीयां बहिरात्मावस्थामनुस्मृत्य विषादं कुर्वन्नाह । मत्त इति । मत्तः आत्मस्वरूपात् । च्युत्वा व्यावृत्य । अहं पतितोऽत्यासक्त्या प्रवृत्तः । क्व । विषयेषु । कैः कृत्वा । इन्द्रियद्वारैः इन्द्रियमुखैः । ततस्तान् विषयान् प्रपद्य ममोपकारका एते इत्यतिगृह्य वानुसृत्य मां आत्मानं न वेद न ज्ञातवान् । कथं । अहमेवाहं न शरीरादिकमित्येवम् । तत्त्वतो

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नज्ञातवानित्यर्थः । कदा । पुरा पूर्वं अना-
दिकाले ॥ १६ ॥

एवं त्यक्त्वा बहिर्वाचं
त्यजेदन्तरशेषतः ।
एष योगः समासेन
प्रदीपः परमात्मनः ॥१७॥

अथात्मनो ज्ञप्तावुपायमुपदर्शयन्नाह । एवमिति । एवं वक्ष्यमाणन्यायेन बहिर्वाचं पुत्रभार्याधनधान्यादिलक्षणां बहिरर्थवाचकशब्दांस्त्यक्त्वा । अशेषतः साकल्येन । पश्चात् अन्तर्वाचं अहं प्रतिपादकः प्रतिपाद्यः सुखी दुःखी चेतना वेत्यादिलक्षणमन्तर्जल्पं त्यजेदशेषतः । एष बहिरन्तर्जल्पत्यागलक्षणो योगः स्वस्वरूपे चित्तनिरोधलक्षणः समाधिः । प्रदीपः स्वरूप-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रकाशकः । कस्य । परमात्मनः । कथम् । समासेन संक्षेपेण । झटिति परमात्मस्वरूपप्रकाशक इत्यर्थः ॥ १७ ॥

यन्मया दृश्यते रूपं
तन्न जानाति सर्वथा ।
जानन्न दृश्यते रूपं
ततः केन ब्रवीम्यहम् ॥१८॥

कुतः पुनर्बहिरन्तर्वाचस्त्यागः कर्तव्य इत्याह । यदिति । रूपं शरीरादिस्वरूपं यत् दृश्यते इन्द्रियैः परिच्छिद्यते मया तदा चेतनत्वाऽक्तमपि वचनं सर्वथा न जानाति । जानता च सह वचनव्यवहारो युक्तो नान्येनातिप्रसङ्गात् । यच्च जानद्रूपं चेतनमात्मस्वरूपं तन्न दृश्यते इन्द्रियैर्न परिच्छिद्यते । यत एवं ततः केन सह ब्रवीम्यहम् ॥१८॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यत्परैः प्रतिपाद्योऽहं
यत्परान्प्रतिपादये ॥
उन्मत्तचेष्टितं तन्मे
यदहं निर्विकल्पकः ॥१९॥

एवं बहिर्विकल्पं परित्यज्यान्तर्विकल्पं परित्यजन्नाह । यत्परैरिति । परैरुपाध्यायादिभिरहं यत्प्रतिपाद्यः । परान् शिष्यादीनहं यत्प्रतिपादये तत्सर्वं मे उन्मत्तचेष्टितं मोहवशादुन्मत्तचेष्टितम् । मोहवशादुन्मत्तस्येवाखिलं विकल्पजालात्मकं विजृम्भितमित्यर्थः । कुत एतत् । यदहं निर्विकल्पकः यद्यस्मात् अहं आत्मा निर्विकल्पक एतैर्वचनविकल्पैरग्राह्यः ॥१९॥

यदग्राह्यं न गृह्णाति
गृहीतं नापि मुञ्चति ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जानाति सर्वथा सर्वं
तत्स्वसंवेद्यमस्म्यहम् ॥२०॥

तदेव विकल्पातीतं स्वरूपं निरूपयन्नाह । यदग्राह्यमिति । यच्छुद्धात्मस्वरूपमग्राह्यं कर्मोदयनिमित्तं क्रोधादिस्वरूपं न गृह्णात्यात्मस्वरूपतया न स्वीकरोति । गृहीतमनन्तज्ञानादिस्वरूपं नैव मुञ्चति कदाचिन्न परित्यजति । तेन च स्वरूपेण सहितं शुद्धमात्मस्वरूपं किं करोति । जानाति । किं तत् । सर्वं चेतनमचेतनं वा वस्तु । कथं जानाति । सर्वथा द्रव्यपर्यायादिसर्वप्रकारेण । तदित्थंभूतं रूपं स्वसंवेद्यं स्वसंवेदनग्राह्यं । अहमात्मास्मिन्नवामि ॥२०

उत्पन्नपुरुषभ्रान्तेः
स्थाणौ यद्वद्विचेष्टितम् ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तद्वन्मे चेष्टितं पूर्वं
देहादिष्वात्मविभ्रमात् ॥२१॥

एवंभूतात्मस्वरूपपरिज्ञानात्पूर्वं कीदृशं मम चेष्टितमित्याह । उत्पन्नेति । उत्पन्नपुरुषभ्रान्तेः पुरुषोऽयमिति उत्पन्ना भ्रान्तिर्यस्य तस्य । स्थाणौ स्थाणुविषये यद्वत् यत्प्रकारेण चेष्टितं विविधमुपकारादिरूपं चेष्टितं विपरीतं वा चेष्टितं तद्वत् तत्प्रकारं मे चेष्टितम् । क्व । देहादिषु । कस्मात् । आत्मविभ्रमात् । आत्मविपर्यासात् । कदा । पूर्वमुक्तप्रकारात्मस्वरूपापरिज्ञानात् प्राक् ।२१॥

यथाऽसौ चेष्टते स्थाणौ
निवृत्ते पुरुषाग्रहे ।
तथाचेष्टोऽस्मि देहादौ
विनिवृत्तात्मविभ्रमः ॥२२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

साम्प्रतं तु तत्परिज्ञाने सति कीदृशं मे चेष्टितमित्याह । यथेति । असावुत्पन्नपुरुषभ्रान्तिः पुरुषग्रहे पुरुषाभिनिवेशो निवृत्ते विनष्टे सति यथा येन पुरुषाभिनिवेशजनितोपकारापकारोद्यमपरित्यागप्रकारेण चेष्टते प्रवर्तते तथा चेष्टोऽस्मि तथा तदुद्यमपरित्यागप्रकारेण चेष्टा यस्यासौ तथाचेष्टोऽस्मि भवाम्यहम् । क । देहादौ । किं विशिष्टः सन् । विनिवृत्तात्मविभ्रमः विशेषेण निवृत्त आत्मविभ्रमो यस्य । क । देहादौ ॥ २२ ॥

येनात्मनानुभूयाह
मात्मनैवात्मनाऽऽत्मनि ॥
सोऽहं न तन्न सा नासौ
नैको न द्वौ न वा बहुः ॥२३ ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

अथेदानीमात्मनि स्त्र्यादिलिङ्गैकत्वादि सङ्ख्याविभ्रमनिवृत्त्यर्थं तद्विविक्तसाधारणस्वरूपदर्शनार्थं चाह। येनेति। येनात्मना चैतन्यस्वरूपेण। इत्थंभावे तृतीया। अहमनुभूय। केन। आत्मनैव नान्येन। केन करणभूतेन आत्मना स्वसंवेदनस्वभावेन। क्व। आत्मनि स्वस्वरूपे। सोऽहमित्थंभूतस्वरूपोऽहं न तत् न नपुंसकं न सा न स्त्री नासौ न पुमान्। अहं तथा नैको न द्वौ न वा बहुः स्त्रीत्वादिधर्म्माणां कर्म्मोत्पादितदेहस्वरूपत्वात्॥ २३॥

यदभावे सुषुप्तोऽहं
यद्भावे व्युत्थितः पुनः॥
अतीन्द्रियमनिर्देश्यं
तत्स्वसंवेद्यमस्म्यहम्॥२४॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

येनात्मना त्वमनुभूयसे स कीदृश इत्याह । यदिनि । यस्य शुद्धस्य स्वसंवेद्यस्य रूपस्याभावेऽनुपलम्भे सुषुप्तो यथावत्पदार्थपरिज्ञानाभावलक्षणनिद्रया गाढाक्रान्तो यद्भावे यस्य तत्स्वरूपस्य भावे उपलम्भे पुनर्व्युत्थितो विशेषेण उत्थितो जागरितोऽहं यथावत्स्वरूपपरिच्छित्तिपरिणत इत्यर्थः । किं विशिष्टं तत्स्वरूपं । अतीन्द्रियमिन्द्रियैरजन्यमग्राह्यं च । अनिर्देश्यं शब्दविकल्पागोचरत्वादिदं चेदं वा निर्देष्टुमशक्यम् । तदेवंविधं स्वरूपं कुतः सिद्धमित्याह । तत्स्वसंवेद्यं तदुक्तप्रकारं स्वरूपं स्वसंवेद्यं स्वसंवेदनग्राह्यमहमस्मि ॥२४॥

क्षीयन्तेऽत्रैवरागाद्या

स्तत्त्वतो मां प्रपश्यतः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

बोधात्मानं ततः कश्चि
न्नमे शत्रुर्न च प्रियः ॥२५॥

तत्स्वरूपं संवेदयतो रागादिप्रक्षयान्न क-
श्चिच्छत्रुमित्रव्यवस्था जवतीति दर्शयन्नाह ।
क्षीयन्त इति । अत्रैव । न केवलमग्रे किन्तु
अत्रैव जन्मनि । क्षीयन्ते । के ते । रागाद्याः ।
आदौ जवः आद्यः राग आद्यो येषां द्वेषा-
दीनां ते तथोक्ताः । किं कुर्वतस्ते क्षीयन्ते ।
तत्त्वतो मां प्रपश्यतः । कथंजूतं माम् । बो-
धात्मानं ज्ञानस्वरूपम् । तत इत्यादि । यतो
यथावदात्मानं पश्यतो रागादयः प्रक्षीणा-
स्ततस्तस्मात्कारणात् न मे कश्चिच्छत्रुर्न च
नैव प्रियो मित्रम् ॥ २५ ॥

मामपश्यन्नयं लोको
न मे शत्रुर्न च प्रियः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मां प्रपश्यन्नयं लोको
न मे शत्रुर्न च प्रियः ॥२६॥

यदि त्वमन्यस्य कस्यचिन्न शत्रुर्मित्रं वा तथापि तवान्यः कश्चिद्भविष्यतीत्याशङ्क्याह । मामिति । आत्मस्वरूपे हि प्रतिपन्नेऽप्रतिपन्ने वाऽयं लोको मयि शत्रुमित्रभावं प्रतिपद्यते । न तावदप्रतिपन्ने यतो मामपश्यन्नयं लोको न मे शत्रुर्नच प्रियः । अप्रतिपन्ने हि वस्तुस्वरूपे रागाद्युत्पत्तावतिप्रसङ्गः । नापि प्रतिपन्ने यतो मां प्रपश्यन्नयं लोको न मे शत्रुर्न च प्रियः । आत्मस्वरूपप्रतीतौ हि रागादीनांप्रक्षयात्कथं क्वचिदपि शत्रुमित्रभावः स्यात् ॥ २६॥

त्यक्त्वैवं बहिरात्मान-
मन्तरात्मव्यवस्थितः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भावयेत्परमात्मानं
सर्वसङ्कल्पवर्जितम् ॥२७॥

अन्तरात्मनो बहिरात्मत्यागे परमात्मप्राप्तौ चोपायं दर्शयन्नाह । त्यक्त्वेति । एवमुक्तप्रकारेणान्तरात्मव्यवस्थितः सन् बहिरात्मानं त्यक्त्वा परमात्मानं भावयेत्। कथंभूतम्। सर्वसङ्कल्पवर्जितम्। विकल्पजालरहितम् । अथवा सर्वसङ्कल्पवर्जितः सन् भावयेत् ॥ २७ ॥

सोऽहमित्यात्तसंस्कार
स्तस्मिन्भावनया पुनः ।
तत्रैव दृढसंस्कारा-
ल्लभते ह्यात्मनः स्थितिम्॥२८॥

तद्भावनाया फलं दर्शयन्नाह । स इति । योऽनन्तज्ञानाद्यात्मकः प्रसिद्धः परमात्मा

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

सोऽहमित्येवमात्तसंस्कार आत्तो गृहीतः संस्कारो वासना येन। कया। तस्मिन् भावनया। तस्मिन्भावनया परमात्मनि भावनया। सोऽहमित्यभेदाभ्यासेन। पुनरत्यन्तं गर्भितवीप्सार्थः। पुनःपुनस्तस्मिन्भावनया तत्रैव परमात्मन्येव दृढसंस्कारादविचलवासनावशाल्लभते प्राप्नोति। ध्याता हि स्फुटमात्मनः स्थितिमात्मन्यविचलतामनन्तज्ञानादिचतुष्टयस्वरूपतां वा ॥२८॥

मूढात्मा यत्र विश्वस्त
स्ततो नान्यद्भयास्पदम्।
यतो भीतस्ततो नान्यद-
भयस्थानमात्मनः ॥२९॥

नन्वात्मभावनाविषये कष्टपरम्परासद्भावेन भयोत्पत्तेः कथं कस्यचित्तत्र प्रवृत्तिरि-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

त्याशङ्कां निराकुर्वन्नाह । मूढेति । मुढात्मा बहिरात्मा यत्र शरीरपुत्रकलत्रादौ विश्वस्तोऽवञ्चकाग्निप्रायेण विश्वासं प्रतिपन्नो मदीया एते अहमेतेषामित्यभेदबुद्धिं गत इत्यर्थः। ततो नान्यद्भयास्पदं ततः शरीरादेर्नान्यद्भयास्पदं संसारदुःखत्रासस्यास्पदं स्थानम्। यतो भीतः यतः परमात्मस्वरूपसंवेदनाद् भीतस्त्रस्तस्ततो नान्यदभयस्थानम् । ततस्तत्स्वसंवेदनात् नान्यदभयस्य संसारदुःखत्रासाभावस्य स्थानमास्पदम् । सुखास्पदं ततो नान्यदित्यर्थः । कस्य । आत्मनः ॥ २९ ॥

सर्वेन्द्रियाणि संयम्य
स्तिमितेनान्तरात्मना ।
यत्क्षणं पश्यतो भाति

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तत्तत्त्वं परमात्मनः ॥३०॥

कीदृशस्तत्प्रतिपत्त्युपाय इत्याह । सर्वेति । संयम्य स्वविषये गच्छन्ति निरुध्य । कानि । सर्वेन्द्रियाणि पञ्चापीन्द्रियाणि । तदनन्तरं स्तिमितेन स्थिरीभूतेनान्तरात्मना मनसा यत्स्वरूपं भाति । किं कुर्वतः । क्षणं पश्यतः क्षणमात्रमनुभवतः । बहुतरकालं मनसःस्थिरीकर्तुमशक्यत्वात् स्तोककालं मनोनिरोधं कृत्वा पश्यतो यच्चिदानन्दस्वरूपं प्रतिभाति तत्तत्त्वं तद्रूपं तत्त्वं स्वरूपं परमात्मनः ॥३०॥

यः परात्मा स एवाहं
योऽहं स परमस्ततः ।
अहमेव मयोपास्यो
नान्यःकश्चिदिति स्थितिः॥३१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कस्मिन्नाराधिते तत्स्वरूपप्राप्तिर्भविष्यतीत्याशङ्क्याह । य इति । यः प्रसिद्धः पर उत्कृष्ट आत्मा स एवाहम् । योऽहं यः स्वसंवेदनप्रसिद्धोऽन्तरात्मा अहं स परमः परमात्मा । ततो यतो मया सह परमात्मनोऽभेदः ततोऽहमेव मयोपास्य आराध्यो नान्यः कश्चिन्मयोपास्य इतिस्थितिः ॥ ३१ ॥

प्राच्याव्य विषयेभ्योऽहं
मां मयैव मयि स्थितम् ।
बोधात्मानं प्रपन्नोऽस्मि
परमानन्दनिर्वृतम् ॥३२॥

एवं स्वरूप एवाराध्याराधकभावव्यवस्था। एतदेवदर्शयन्नाह । प्राच्याव्येति । ममात्मानमहं प्रपन्नः प्राप्तोऽस्मि भवामि । किं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कृत्वा । प्राण्याण्य विषयेभ्यः । केन कृत्वा । मयैवात्मस्वरूपेणैव करणात्मना । क स्थितं मां प्रपन्नोऽहं । मयि स्थितमात्मस्वरूप एव स्थितम् । कथंभूतं मां । बोधात्मानं ज्ञानस्वरूपम् । पुनरपि कथंभूतम् । परमानन्दनिर्वृतं परमश्चासावानन्दश्च सुखं तेन निर्वृतं सुखीभूतमथवा परमानन्दनिर्वृतोऽहम् ॥ ३२ ॥

यो न वेत्ति परं देहा-
देवमात्मानमव्ययम् ।
लभते न स निर्वाणं
तप्त्वापि परमं तपः ॥३३॥

एवमात्मानं शरीराद्भिन्नं यो न जानाति तं प्रत्याह । य इति । यः प्रतिपन्नाद्देहात्परं भिन्नमात्मानमेवमुक्तप्रकारेण न वेत्ति

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

किं विशिष्टम् । अव्ययमपरित्यक्तानन्तचतुष्टयस्वरूपम् । स न निर्वाणं लभते । किं कृत्वा । लब्ध्वाऽपि । किं तत् । परमं तपः ॥३३॥

आत्मदेहान्तरज्ञान-
जनिताह्लादनिर्वृतः ।
तपसा दुष्कृतं घोरं
भुञ्जानोऽपि न खिद्यते ॥३४॥

ननु परमतपोऽनुष्ठायिनां महद्दुःखोत्पत्तितो मनःखेदसद्भावात्कथं निर्वाणप्राप्तिरिति वदन्तं प्रत्याह । आत्मेति । आत्मा च देहश्च तयोरन्तरज्ञानं भेदज्ञानं तेनजनितश्चासावाह्लादश्च परमप्रसत्तिस्तेन निर्वृतः सुखीभूतः संस्तपसा द्वादशविधेन कृत्वा दुष्कृतं घोरं भुञ्जानोऽपि दुष्कर्म्मणो रौद्रस्य विपाकमनुभवन्नपि न

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

खिद्यते खेदं न गच्छति ॥ ३४ ॥

रागद्वेषादिकल्लोलै-
रलोलं यन्मनोजलम् ।
स पश्यत्यात्मनस्तत्त्वं
स तत्त्वं नेतरो जनः ॥३५॥

खेदं गच्छतामात्मस्वरूपोपलम्भाभावं द-र्शयन्नाह । रागेति । रागद्वेषादय एव कल्लोलास्तैरलोलमचञ्चलमकलुषं वा य-न्मनोजलं मन एव जलं मनोजलं यस्य म-नोजलं यन्मनोजलं स आत्मा पश्यति । आत्मनस्तत्त्वमात्मनः स्वरूपम् । स तत्त्वं स आत्मदर्शी तत्त्वं परमात्मस्वरूपम् । नेतरो जनः । तत्त्वं न भवति ॥ ३५ ॥

अविक्षिप्तं मनस्तत्त्वं
विक्षिप्तं भ्रान्तिरात्मनः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

धारयेत्तदविक्षिप्तं
विक्षिप्तं नाश्रयेत्ततः ॥३६॥

किं पुनस्तत्त्वशब्देनोच्यत इत्याह । अविक्षिप्तमिति । अविक्षिप्तं रागाद्यपरिणतं देहादिनाऽत्मनोऽभेदाध्यवसायपरिहारेण स्वस्वरूप एव निश्चलतां गतम् । इत्थंभूतं मनस्तत्त्वं वास्तवं रूपमात्मनः । विक्षिप्तमुक्तविपरीतं मनोभ्रान्तिरात्मस्वरूपं न भवति । यत एवं ततस्तस्माद्धारयेत् । किं तत् । मनः । कथंभूतं । अविक्षिप्तम् । विक्षिप्तं पुनस्तन्नाश्रयेन्नधारयेत् ॥३६॥

अविद्याभ्याससंस्कारै-
रवशं क्षिप्यते मनः ।
तदेव ज्ञानसंस्कारैः
स्वतस्तत्त्वेऽवतिष्ठते ॥३७॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कुतःपुनर्मनसो विक्षेपो भवति कुतश्चाविक्षेप इत्याह । अविद्येति । शरीरादौ शुचिस्थिरात्मात्मीयादिज्ञानान्यविद्यास्ता साम्भ्यासः पुनः पुनः प्रवृत्तिस्तेन जनिताः संस्कारावासनास्तैः कृत्वा । अवशं विषयेन्द्रियाधीनमनात्मायत्तमित्यर्थः । क्षिप्यते विक्षिप्तं भवति । मनः । तदेव मनो ज्ञानसंस्कारैरात्मनः शरीरादिभ्यो भेदज्ञानाभ्यासैः स्वतः स्वयमेव तत्त्व आत्मस्वरूपेऽवतिष्ठते ॥ ३७ ॥

अपमानादयस्तस्य
विक्षेपो यस्य चेतसः ।
नापमानादयस्तस्य
न क्षेपो यस्य चेतसः ॥३८॥

चित्तस्य विक्षेपेऽविक्षेपे च फलं दर्शयन्ना-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ह । अपमानइति । अपमानो महत्त्वख-
एडनमवज्ञा च स आदिर्येषां मदेर्ष्यामा-
त्सर्यादीनां तेऽपमानादयो जवन्ति । य-
स्य चेतसो विक्षेपो रागादिपरिणतिर्जवति
यस्य पुनश्चेतसो न क्षेपो विक्षेपो नास्ति त-
स्य नापमानादयो जवन्ति ॥ ३० ॥

यदा मोहात्प्रजायेते
रागद्वेषौ तपस्विनः ।
तदैव जावयेत्स्वस्थ-
मात्मानं शाम्यतः क्षणात् ॥ ३ए ॥

अपमानादीनां चापगमे उपायमाह ।
यदेति । मोहान्मोहनीयकर्म्मोदयाद् यदा
प्रजायेत उत्पद्येते कौ । रागद्वेषौ । कस्य ।
तपस्विनः । तदैव रागद्वेषोदयकाल एव ।
आत्मानं स्वस्थं बाह्यविषयाद्व्यावर्त्य स्वस्व-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

रूपस्थं जावयेत्। शाम्यतः ज्पशमं गच्छतः रागद्वेषौ क्षणात् क्षणमात्रेण ॥३ए॥

यत्र काये मुनेः प्रेम
ततः प्राच्याव्य देहिनम्।
बुद्ध्या तदुत्तमे काये
योजयेत्प्रेम नश्यति ॥४०॥

तत्र रागद्वेषयोर्विषयं विपक्षं च प्रदर्शयन्नाह। यत्र आत्मीये परकीये वा काये शरीरेन्द्रियविषयसङ्घाते वा मुनेः प्रेम स्नेहस्ततः कायात् प्राच्याव्य व्यावर्त्य देहिनमात्मानम्। कया। बुद्ध्या विवेकज्ञानेन। पश्चात्तदुत्तमे काये तस्मात्प्रागुक्तकायादुत्तमे चिदानन्दमय आत्मस्वरूपे योजयेत्।कया कृत्वा। बुद्ध्याऽन्तर्दृष्ट्या। ततः किं जवति। प्रेम नश्यति कायस्नेहो न जवति ॥४०॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आत्मविभ्रमजं दुःख-
मात्मज्ञानात्प्रशाम्यति ।
नायतास्तत्र निर्वान्ति
कृत्वाऽपि परमं तपः ॥४१॥

तस्मिन्नष्टे किं भवतीत्याह । आत्मेति । आत्मविभ्रजं आत्मनो विभ्रमोऽनात्मनि शरीरादावात्मेति ज्ञानं तस्माज्जातं यत् दुःखं तत् प्रशाम्यति । कस्मात् । आत्मज्ञानात् । शरीरादिभ्यो भेदेनात्मस्वरूपसंवेदनात् । ननु दुर्धरतपोऽनुष्ठानान्मुक्तिसिद्धेरतस्तद्दुःखोपशमो भविष्यतीति वदन्तं प्रत्याह । नेत्यादि । तत्र आत्मस्वरूपे अयताः अयत्नपराः निर्वान्ति निर्वाणं गच्छन्ति सुखिनो वा भवन्ति न । किं कृत्वाऽपितप्त्वाऽपि । किं तत् । परमं तपः । दुर्धरानु-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ष्ठानम् ॥ ४१ ॥

शुभं शरीरं दिव्यांश्च
विषयानभिवाञ्छति ।
उत्पन्नात्ममतिर्देहे
तत्त्वज्ञानी ततश्च्युतिम्॥४२॥

तच्च कुर्वाणो बहिरात्मा अन्तरात्मा च किं करोतीत्याह । शुभमिति । देह उत्पन्नात्ममतिर्बहिरात्माभिवाञ्छति अभिलषति । किं तत । शुभं शरीरं दिव्यांश्चोत्तमान् स्वर्गसम्बन्धिनो वा विषयान् । अन्तरात्मा किं करोतीत्याह । तत्त्वज्ञानी ततश्च्युतिम् । तत्त्वज्ञानी विवेक्यन्तरात्मा ततः शरीरादेश्च्युतिं व्यावृत्तिं मुक्तिरूपामभिवाञ्छति ॥ ४२ ॥

परत्राहंमतिः स्वस्मा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ञ्च्युतो बध्नात्यसंशयम् ।
स्वस्मिन्नहंमतिश्च्युत्वा
परस्मान्मुच्यते बुधः ॥४३॥

तत्त्वज्ञानीतरयोर्बन्धकत्वाबन्धकत्वे द-र्शयन्नाह । परत्रेति । परत्र शरीरादावहंम-तिरात्मबुद्धिर्बहिरात्मा स्वस्मादात्मस्वरू-पाच्च्युतः प्रभ्रष्टः सन् बध्नाति कर्म्मबन्ध-नबद्धं करोतीत्यात्मानम् । असंशयं यथा-भवति नियमेन बध्नातीत्यर्थः । स्वस्मिन्ना-त्मस्वरूपेऽहंमतिः बुधोऽन्तरात्मा परस्मा-च्छरीरादेश्च्युत्वा पृथग्भूत्वा मुच्यते सक-लकर्म्मबन्धनरहितो भवति ॥ ४३ ॥

दृश्यमानमिदं मूढ-
स्त्रिलिङ्गमवबुध्यते ।
इदमित्यवबुद्धस्तु

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

निष्पन्नं शब्दवर्जितम् ॥४४॥

यत्राहंमतिबहिरात्मनो जाता तत्तेन कथमध्यवसीयते यत्र चान्तरात्मनस्तत्तेन कथमित्याशङ्क्याह । दृश्यमानमिति । दृश्यमानं शरीरादिकम् । किं विशिष्टम् । त्रिलिङ्गम् । त्रीणि स्त्रीपुन्नपुंसकलक्षणानि लिङ्गानि यस्य तद्दृश्यमानं त्रिलिङ्गं सत् मूढो बहिरात्मा इदमात्मतत्त्वं त्रिलिङ्गं मन्यते । दृश्यमानादभेदाध्यवसायेन । यः पुनरवबुद्धोन्तरात्मा स इदमात्मतत्त्वमित्येवं मन्यते। न पुनस्त्रिलिङ्गतया। तस्याः शरीरधर्मताया आत्मस्वरूपत्वाभावात् । कथंभूतमिदमात्मस्वरूपम्। निष्पन्नमनादिसंसिद्धं तथा शब्दवर्जितं विकल्पाभिधानागोचरम् ॥ ४४ ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जानन्नप्यात्मनस्तत्त्वं
विविक्तं भावयन्नपि ।
पूर्वविभ्रमसंस्कारा-
द्भ्रान्तिं भूयोऽपि गच्छति

ननु यद्यन्तरात्मैवमात्मानं प्रतिपद्यते तदा कथं पुमानहं गौरोऽहमित्यादिरूपा तस्य कदाचिदभेदभ्रान्तिः स्यादिति वदन्तं प्रत्याह । जानन्निति । आत्मनस्तत्त्वं स्वरूपं जानन्नपि । तथा विविक्तं शरीरादिभ्यो भिन्नं भावयन्नपि । उभयत्रापिशब्दः परस्परसमुच्चये । भूयोऽपि पुनरपि भ्रान्तिं गच्छति । कस्मात् । पूर्वविभ्रमसंस्कारात् । पूर्वविभ्रमो बहिरात्मावस्थाभावी ॥४५॥

अचेतनमिदं दृश्य-
मदृश्यं चेतनं ततः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

क रुष्यामि क तुष्यामि
मध्यस्थोऽहं भवाम्यतः ॥४६॥

शरीरादिस्वात्मविपर्यासस्तेन जनितः संस्कारो वासना तस्मात् ज्रूयो ज्रान्तिं गतोऽसौ कथं तां त्यजेदित्याह । अचैतन मिति । इदं शरीरादिकं दृश्यमिन्द्रियैः प्रतीयमानमचेतनं जमं रोषतोषादिकं कृतं न जानातीत्यर्थः । यत्तु चेतनमात्मस्वरूपं तददृश्यमिन्द्रियग्राह्यं न ज्ञवति । ततो यतो रोषतोषविषयं दृश्यशरीरादिकमचेतनम् । चेतनं त्वात्मस्वरूपमदृश्यत्वात् तद्विषयमेव न ज्ञवति । ततः क रुष्यामि क तुष्याम्यहम् । अतो यतो रोषतोषयोः कश्चिदपि विषयो न घटतेऽतो मध्यस्थ उदासीनोऽहं ज्ञवामि ॥ ४६ ॥

त्यागादाने बहिर्मूढः

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

करोत्यध्यात्ममात्मवित् ।
नान्तर्बहिरुपादानं
न त्यागो निष्ठितात्मनः॥४७॥

इदानीं मूढात्मनोऽन्तरात्मनश्च त्यागोपादानविषयं प्रदर्शयन्नाह । त्यागेति। मूढो बहिरात्मा त्यागोपादाने करोति । क्व । बहिर्बाह्यवस्तुनि द्वेषोदयादभिलाषभावान्मूढात्मा त्यागं करोति रागोदयात् तत्राभिलाषोत्पत्तेरुपादानमिति । आत्मविदन्तरात्मा पुनः अध्यात्मनि स्वात्मरूप एव त्यागोपादाने करोति । तत्रहि त्यागो रागद्वेषादेरन्तर्जल्पविकल्पादेर्बाह्याकारश्चिदानन्दादेः। यस्तु निष्ठितात्मा कृतकृत्यात्मा तस्य अन्तर्बहिर्वानोपादानं तथा न त्यागः ४७

युञ्जीत मनसाऽत्मानं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वाक्कायाभ्यां वियोजयेत् ।
मनसा व्यवहारं तु
त्यजेद्वाक्काययोजितम् ॥४८॥

अन्तर्बहिर्वा अन्तस्त्यागोपादाने कुर्वाणोऽन्तरात्मा कथं कुर्यादित्याह । युञ्जीतेति । आत्मानं युञ्जीत सम्बद्धं कुर्यात् । केन सह । मनसा मानसज्ञानेन चित्तमात्मेत्यभेदेनाध्यवसेदित्यर्थः । वाक्कायाभ्यां तु पुनर्वियोजयेत् पृथक्कुर्यात् । वाक्कायात्माभेदाध्यवसायं न कुर्यादित्यर्थः । एतच्च कवाणो व्यवहारं तु प्रतिपाद्यप्रतिपादकभावलक्षणं प्रवृत्तिनिवृत्तिरूपं वा वाक्काययोजितं वाक्कायाभ्यां योजितं सम्पादितम् । केन सह । मनसा सह । मनस्यारोपितं व्यवहारं मनसा त्यजेत् चित्तेनन चिन्तयेत् ॥ ४८ ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जगद्देहात्मदृष्टीनां
विश्वास्यं रम्यमेव च ।
स्वात्मन्येवात्मदृष्टीनां
क्व विश्वासः क्व वा रतिः॥४९॥

ननु पुत्रकलत्रादिना सह वाक्कायव्यवहारे सुखोत्पत्तिप्रतीतेः कथं तत्त्यागो युक्त इत्याह । जगदिति । देहात्मदृष्टीनां बहिरात्मनां जगत् पुत्रकलत्रादिप्राणिगणो विश्वास्यमवञ्चकं रम्यमेव च रमणीयमेव वा प्रतिभाति । स्वात्मन्येव स्वस्वरूप एवात्मदृष्टीनामन्तरात्मनां क्व विश्वासः क्व वा रतिः । न क्वापि । पुत्रकलत्रादौ तेषां विश्वासो रतिर्वा प्रतिभातीत्यर्थः ॥ ४९ ॥

आत्मज्ञानात्परं कार्यं
न बुद्धौ धारयेच्चिरम् ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

कुर्यादर्थवशात्किञ्चि-
द्वाक्कायाभ्यामतत्परः ॥५०॥

नन्वेवमाहारादावप्यन्तरात्मनः कथं प्रवृत्तिः स्यादित्याह । आत्मेति । चिरं बहुतरं कालं न बुद्धौ धारयेत् । किं तत् । कार्यम् । कथंभूतम् । परमन्यत् । कस्मात् । आत्मज्ञानात् । आत्मज्ञानलक्षणमेव कार्यं बुद्धौ चिरं धारयेदित्यर्थः । परमपि किञ्चिद्भोजनव्याख्यानादिकं वाक्कायाभ्यां कुर्यात् । कस्मात् । अर्थवशात् । स्वपरोपकारलक्षणप्रयोजनवशात् । किंविशिष्टः । अतत्परः तदनासक्तः ॥ ५० ॥

यत्पश्यामीन्द्रियैस्तन्मे
नास्ति यन्नियतेन्द्रियः ।
अन्तः पश्यामि सानन्दं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तदस्य ज्योतिरुत्तमम् ॥५१॥

कुतः पुनरात्मज्ञानमेव बुद्धौ धारयेन्न शरीरादिकमित्याह । यदिति । यच्छरीरादिकमिन्द्रियैः पश्यामि तन्मे नास्ति मदीयं रूपं तन्न भवति। तर्हि किं तव रूपं तदस्तु। ज्योतिरुत्तमं ज्योतिर्ज्ञानमुत्तममतीन्द्रियम्। तथा सानन्दं परमप्रसत्तिसमुद्भूतसुखसमन्वितम् । एवंविधं ज्योतिः अन्तः पश्यामि स्वसंवेदनेनानुभवामि। यत्तन्मे स्वरूपमस्तु भवतु । विशिष्टः पश्यामि । नियतेन्द्रियो निर्यन्त्रितेन्द्रियः ॥ ५१ ॥

सुखमारब्धयोगस्य
बहिर्दुःखमथात्मनि ।
बहिरेवासुखं सौख्य-
मध्यात्मं भावितात्मनः॥५२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ननु सानन्दं ज्योतिर्यद्यात्मनो रूपं स्यात्तदेन्द्रियनिरोधं कृत्वा तदनुभवतः कथं दुःखं स्यादित्याह । सुखमिति । बहिर्बाह्यविषये सुखं भवति । कस्य । आरब्धयोगस्य प्रथममात्मस्वरूपभावनोद्यतस्य । अथ अहो आत्मनि आत्मस्वरूपे दुःखं तस्य भवति । भावितात्मनः यथावद्विदितात्मस्वरूपे कृताभ्यासस्य बहिरेव बाह्यविषयेष्वेवासुखं भवति । अथ अहो सौख्यं तस्याध्यात्ममात्मस्वरूप एव भवति ॥५२॥

तद्ब्रूयात्तत्परान्पृच्छे-
त्तदिच्छेत्तत्परो भवेत् ।
येनाविद्यामयं रूपं
त्यक्त्वा विद्यामयं व्रजेत् ॥५३॥

तद्भावना चेत्थं कुर्यादित्याह । तदिति ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तदात्मस्वरूपं परानुविदितात्मस्वरूपान् पृच्छेत् । तथा तत् आत्मस्वरूपं इच्छेत् परमार्थतः सन्मन्येत् । तत्परो भवेदात्मस्वरूपभावनादरपरो भवेत् । येनात्मस्वरूपेणाहंभावितेनाविद्यामयं रूपं बहिरात्मस्वरूपं त्यक्त्वा विद्यामयं रूपं परमात्मस्वरूपं व्रजेत् ॥५३॥

शरीरे वाचि चात्मानं
संधत्ते वाक्शरीरयोः ।
भ्रान्तोऽभ्रान्तः पुनस्तत्त्वं
पृथगेषां निबुध्यते ॥५४॥

ननु वाक्कायव्यतिरिक्तस्यात्मनाऽसम्भवात्तद्ब्रूयादित्याद्ययुक्तमिति वदन्तं प्रत्याह । शरीर इति । संधत्त आरोपयति । कम् । आत्मानम् । क । शरीरे वाचि च । कोऽसौ ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वाक्शरीरयोर्भ्रान्तः वागात्मा शरीरमात्मेत्येवं विपर्यस्तो बहिरात्मा । तयोरभ्रान्तो यथावत्तत्स्वरूपपरिच्छेदकोऽन्तरात्मा पुनरेषां वाक्शरीरात्मनां तत्त्वं स्वरूपं पृथक् परस्परविभिन्नं निबुध्यते निश्चिनोति ॥ ५४ ॥

न तदस्तीन्द्रियार्थेषु
यत्क्षेमङ्करमात्मनः ।
तथाऽपि रमते बालस्त-
त्रैवाज्ञानभावनात् ॥५५॥

एवमबुध्यमानो मूढात्मा येषु विषयेष्वासक्तचित्तस्तेन तेषु मध्ये किञ्चित्तस्योपकारकमस्तीत्याह । नेति । इन्द्रियार्थेषु पञ्चेन्द्रियविषयेषु मध्ये न तत् किञ्चिदस्ति यत् क्षेमङ्करम् । कस्य । आत्मनः । तथा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ऽपि यद्यपि क्षेमङ्करं किञ्चिन्नास्ति तथाऽपि रमते रतिं करोति । कोऽसौ । बालो बहिरात्मा । तत्रैव इन्द्रियार्थेष्वेवाकस्मादज्ञानभावनान्मिथ्यात्वसंस्कारवशात् । अज्ञानं भाव्यते जन्यते येनासावज्ञानभावनो मिथ्यात्वसंस्कारस्तस्मात् ॥५५॥

चिरं सुषुप्तास्तमसि
मूढात्मानःकुयोनिषु ।
अनात्मीयात्मभूतेषु
ममाहमिति जाग्रति ॥५६॥

तथाऽनादिमिथ्यात्वसंस्कारे सत्येवंभूता बहिरात्मानो भवन्तीत्याह । चिरमिति । चिरमनादिकालं मूढात्मानो बहिरात्मानः सुषुप्ता अतीव जडतां गताः । केषु । कुयोनिषु नित्यनिगोधादिचतुरशीतिलक्षयोनि-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ष्वधिकरणभूतेषु । कस्मिन् सती ते तेषु सुषुप्ताः । तमसि अनादिमिथ्यात्वसंस्कारे सति । इत्थंभूताः सन्तस्ते यदि संज्ञिषूत्पद्य कदाचिद्दैववशाद्बुध्यन्ते तदा ममाहमिति जाग्रति । केषु । अनात्मीयात्मभूतेषु अनात्मीयेषु परमार्थतोऽनात्मीयभूतेषु पुत्रकलत्रादिषु ममैत इति जाग्रति अध्यवस्यन्ति । अनात्मभूतेषु शरीरादिषु अहमेवैते इति जाग्रति अध्यवस्यन्ति ॥५६॥

पश्येन्निरन्तरं देह-
मात्मनोऽनात्मचेतसा ।
अपरात्मधियाऽन्येषा
मात्मतत्त्वे व्यवस्थितः ॥५७॥

ततो बहिरात्मरूपं परित्यज्य स्वपरशरीरमित्थं पश्येदित्याह । पश्येदिति । आ-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

त्मनो देहमात्मसम्बन्धिशरीरं अनात्मचेतसा अयमात्मा न नवतीति बुध्याअन्तरात्मा पश्येत् निरन्तरं सर्वदा । तथा अन्येषां देहमपरात्मधियां परेषां परमात्मा न नवतीति बुध्या पश्येत् । किं । विशिष्टः । आत्मतत्त्वे व्यवस्थित आत्मस्वरूपनिष्ठः ॥५७॥

अज्ञापितं न जानन्ति
यथा मां ज्ञापितं तथा ।
मूढात्मानस्ततस्तेषां
वृथा मे ज्ञापनश्रमः ॥५८॥

नन्वेवमात्मतत्त्वं स्वयमनुनूय मूढात्मनां किमिति न प्रतिपाद्यते येन तेऽपि न जानन्तीति वदन्तं प्रत्याह । अज्ञापितमिति । मूढात्मानो मामात्मस्वरूपमज्ञापितमप्रतिपादितं यथा न जानन्ति मूढात्मत्वात्

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तथा ज्ञापितमपि मां ते मढात्मत्वादेव न जानन्ति । ततस्तेषां ततः सर्वथा परिज्ञानाभावात् तेषां मूढात्मनां सम्बन्धित्वेन वृथा मे ज्ञापनश्रमः विफलो मे तत्स्वरूपप्रतिपादनप्रयासः ॥ ५८ ॥

यद्बोधयितुमिच्छामि
तन्नाहं यदहं पुनः ।
ग्राह्यं तदपि नान्यस्य
तत्किमन्यस्य बोधये ॥५९॥

किं च । यदिति । यत् विकल्पाधिरूढमात्मस्वरूपं देहादिकं वा बोधयितुं ज्ञापयितुमिच्छामि तन्नाहं तत्स्वरूपं नाहं नात्मस्वरूपं परमार्थतो भवामि । यदहं पुनः यत्पुनरहं चिदानन्दात्मकं स्वसंवेद्यमात्मरूपं तदपि ग्राह्यं नान्यस्य स्वसंवेदनेन तदनु-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

न्नूयते इत्यर्थः । तत्किमन्यस्य बोधये तत् तस्मात् किं किमर्थमन्यस्य आत्मस्वरूपं बोधयेऽहम् ॥ ५९ ॥

बहिस्तुष्यति मूढात्मा
पिहितज्योतिरन्तरे ।
तुष्यत्यन्तः प्रबुद्धात्मा
बहिर्व्यावृत्तकौतुकः ॥६०॥

बोधितेऽपि चान्तस्तत्त्वे बहिरात्मनो न तत्रानुरागः सम्भवति मोहोदयात्तस्य बहिरर्थ एवानुरागादिति दर्शयन्नाह । बहिरिति । बहिः शरीराद्यर्थे तुष्यति प्रीतिं करोति। कोऽसौ । मूढात्मा कथम्भूतः । पिहितज्योतिर्मोहाभिभूतज्ञानः । क । अन्तरे अन्तस्तत्त्वविषये । प्रबुद्धात्मा मोहानभिभूतज्ञानोऽन्तस्तुष्यति स्वस्वरूपे प्रीतिं करोति।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

किंविशिष्टः सन्। बहिर्व्यावृत्तकौतुकः शरीरादौ निवृत्तानुरागः ॥ ६० ॥

न जानन्ति शरीराणि
सुखदुःखान्यबुद्धयः ।
निग्रहानुग्रहधियं
तथाऽप्यत्रैव कुर्वते ॥६१॥

कुतोऽसौ शरीरादिविषये निवृत्तभूषणमण्डनादिकौतुक इत्याह। नेति। सुखदुःखानि न जानन्ति। कानि। शरीराणि। जडत्वादबुद्धयः बहिरात्मानः। तथाऽपि यद्यपि न जानन्ति तथापि। अत्रैव शरीरादावेव कुर्वते। कम्। निग्रहानुग्रहधियम्। द्वेषवशादुपवासादिना शरीरादेः कदर्थनाभिप्राया निग्रहबुद्धिः। रागवशात्कटककटिसूत्रादिना भूषणाभिप्रायानुग्रहबुद्धिः।६१।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

स्वबुद्ध्या यावद्गृह्णीयात्
कायवाक्चेतसां त्रयम् ।
संसारस्तावदेतेषां
भेदाभ्यासे तु निर्वृतिः ॥६२॥

यावच्च शरीरादावात्मबुद्ध्या प्रवृत्तिस्तावत्संसारस्तदभावान्मुक्तिरिति दर्शयन्नाह । स्वेति । स्वबुद्ध्या आत्मबुद्ध्या यावद्गृह्णीयात् । किं तत् । त्रयम् । केषाम् । कायवाक्चेतसाम् । सम्बन्धमिति च पाठः । तत्र कायवाक्चेतसां त्रयं कर्तृ आत्मनि यावत्स्वसम्बद्धं गृह्णीयात् स्वीकुर्यादित्यर्थः । तावत्संसारः । एतेषां कायवाक्चेतसां भेदाभ्यासेत्वात्मनः सकाशात् कायवाक् चेतांसि भिन्नानीति भेदाभ्यासे भेदभावनायां तु पुनर्निर्वृतिः मुक्तिः ॥६२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

घने वस्त्रे यथात्मानं
न घनं मन्यते तथा ।
घने स्वदेहेऽप्यात्मानं
न घनं मन्यते बुधः ॥६३॥

शरीरादावात्मनो भेदाभ्यास इव शरीर-दृढतादौ नात्मनो दृढतादिकं मन्येतेति दर्शयन् घनेत्यादिश्लोकचतुष्टयमाह । घन इति । निबिडावयवे वस्त्रे प्रावृते सति आत्मानं घनं दृढावयवं यथा बुधो न मन्यते तथा स्वदेहेऽपि घने दृढ आत्मानं घनं दृढं बुधो न मन्यते ॥ ६३ ॥

जीर्णे वस्त्रे यथात्मानं
न जीर्णं मन्यते तथा ।
जीर्णे स्वदेहेऽप्यात्मानं
न जीर्णं मन्यते बुधः ॥६४॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जीर्ण इति । जीर्णे पुराणे वस्त्रे प्रावृते यथात्मानं बुधो जीर्णं न मन्यते तथा जीर्णे वृद्धे स्वदेहेऽपि स्थितमात्मानं न जीर्णं वृद्धं मन्यते बुधः ॥ ६४ ॥

नष्टे वस्त्रे यथात्मानं
न नष्टं मन्यते तथा ।
नष्टे स्वदेहेऽप्यात्मानं
न नष्टं मन्यते बुधः ॥६५॥

नष्ट इति । प्रावृते वस्त्रे नष्टे सति आत्मानं यथा नष्टं बुधो न मन्यते तथा स्वदेहेऽपि नष्टे कुतश्चित्कारणाद्विनाशं गत आत्मानं न नष्टं मन्यते बुधः ॥ ६५ ॥

रक्ते वस्त्रे यथात्मानं
न रक्तं मन्यते तथा ।
रक्ते स्वदेहेऽप्यात्मानं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

न रक्तं मन्यते बुधः ॥६६॥

रक्त इति। रक्ते वस्त्रे प्रावृते सति आत्मानं यथा बुधो न रक्तं मन्यते तथा स्वदेहेऽपि कुङ्कुमादिना रक्ते आत्मानं रक्तं न मन्यते बुधः ॥ ६६ ॥

यस्य सस्पन्दमाभाति
निःस्पन्देन समं जगत्।
अप्रज्ञमक्रियाभोगं
स शमं याति नेतरः ॥६७॥

एवं शरीरादिभिन्नमात्मानं भावयतोऽन्तरात्मनः शरीरादेः काष्ठादिना तुल्यताप्रतिभासे मुक्तियोग्यता भवतीति दर्शयन्नाह। यस्येति। यस्यात्मनः सस्पन्दं परिस्पन्दसमन्वितं शरीरादिरूपं जगदाभाति प्रतिभासते। कथंभूतम्। निःस्पन्देन

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

समं निःस्पन्देन काष्ठपाषाणादिना समं तुल्यम् । कुतस्तेन तत्समं । अप्रज्ञं जडं अचेतनं यतः । तथा अक्रियाभोगं क्रिया पदार्थपरिच्छित्तिः भोगः सुखाद्यनुभवः तौ न विद्येते यत्र । यस्यैवं तत्प्रतिभासते स किं करोति । स शमं याति शमं परमवीतरागता संसारभोगदेहोपरि वा वैराग्यं गच्छति । कथंभूतं शामम् । अक्रियाभोगमित्येतदत्रापि संबन्धनीयम् । क्रिया वाक्कायमनोव्यापारो भोग इन्द्रियप्रणालिकया विषयानुभवनं विषयोद्भवः तौ न विद्येते यत्र तमित्थंभूतं शमं स याति नेतरः ॥६७॥

शरीरकञ्चुकेनात्मा
संवृतज्ञानविग्रहः ।
नात्मानंबुध्यते तस्मा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भ्रमत्यतिचिरं भवे ॥६८॥

न तद्विलक्षणो बहिरात्मा। असावप्येवं शरीरादिभ्यो विभिन्नमात्मानं किमिति न प्रतिपद्यत इत्याह। शरीरेति । शरीरमेव कञ्चुकस्तेन संवृतः सम्मक् प्रच्छादितः ज्ञानमेव विग्रहः स्वरूपं यस्य । शरीर सामान्योपादानेऽप्यत्र कार्म्मणशरीरमेव गृह्यते। तस्यैव मुख्यवृत्त्या तदावरणकत्वोपपत्तेः। इत्थंभूतो बहिरात्मा नात्मानं बुध्यते । तस्मादात्मस्वरूपानवबोधात् । अतिचिरं बहुतरकालं भवे संसारे भ्रमति६८

प्रविशद्गलतां व्यूहे
देहेऽणूनां समाकृतौ।
स्थितिभ्रान्त्या प्रपद्यन्ते
तमात्मानमबुध्यः ॥६९॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यद्यात्मस्वरूपमात्मत्वेन बहिरात्मानो न बुध्यन्ते तदा किमात्मत्वेन ते बुध्यन्त इत्याह । प्रविशदिति । तं देहमामात्मानं प्रपद्यन्ते। के ते। अबुद्ध्यः बहिरात्मानः। कया कृत्वा। स्थितिभ्रान्त्या। क्व। देहे । कथंभूते देहे। व्यूहे समूहे। केषाम्। अणूनां परमाणूनाम्। किं विशिष्टानाम्। प्रविशद्गलतां अनुप्रविशतां निर्गच्छतां च। पुनरपि कथंभूते। समाकृतौ समानाकारे हकूपरापरोत्पादेनात्मनासहैकत्र क्षेत्रे समानावगाहे च वा। इत्थंभूते देहे या स्थितिभ्रान्तिः स्थित्या कालान्तरस्थायित्वेन एकक्षेत्रावस्थानेन वा भ्रान्तिः देहात्मनोरभेदाध्यवसायस्तया ॥६९॥

गौरः स्थूलः कृशो वाह-
मित्यङ्गेनाविशेषयन् ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आत्मानं धारयेन्नित्यं
केवलज्ञप्तिविग्रहम् ॥७०॥

ततो यथावदात्मस्वरूपप्रतिपत्तिमिच्छन्नात्मानं देहाद्भिन्नं भावयेदित्याह । गौर इति । गौरोऽहं स्थूलोऽहं कृशो वाहमिति अनेनप्रकारेणाङ्गेन विशेषणेनाविशेषयन् विशिष्टमकुर्वन्नात्मानं धारयेत् चित्ते । अविचलं भावयेत् । नित्यं सर्वदा । कथंभूतम् । केवलज्ञप्तिविग्रहं केवलं ज्ञानस्वरूपम् । अथवा केवला रूपादिरहिता ज्ञप्तिरेवोपयोग एव विग्रहः स्वरूपं यस्य ॥ ७० ॥

मुक्तिरेकान्तिकी तस्य
चित्ते यस्याचला धृतिः ।
तस्य नैकान्तिकी मुक्ति-
र्यस्य नास्त्यचला धृतिः ॥७१॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

यश्चैवंविधमात्मानमेकाग्रमनसा भावये-त्तस्यैव मुक्तिर्नान्यस्येत्याह । मुक्तिरिति । एकान्तिकी अवश्यंभाविनी। तस्यान्तरात्मनो मुक्तिर्यस्य चित्ते अचला अविचला धृतिः आत्मस्वरूपधारणं स्वरूपविषया प्रसत्तिर्वा। यस्य तु चित्ते नास्त्यचला धृतिस्तस्य नैकान्तिकी मुक्तिः ॥७१॥

जनेभ्यो वाक्ततः स्पन्दो
मनसश्चित्रविभ्रमाः ।
भवन्ति तस्मात्संसर्गं
जनैर्योगी ततस्त्यजेत् ॥७२॥

चित्तेऽचला धृतिश्च लोकसंसर्गपरित्यज्यात्मस्वरूपस्य संवेदनानुभवे सति स्यान्नान्यथेति दर्शयन्नाह । जनेभ्य इति । जनेभ्यो वाक् वचनप्रवृत्तिर्भवति । ततो व-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

चनप्रवृत्तेः स्पन्दो मनसः व्यग्रता मानसे भवति । तस्मान्मनःस्पन्दाच्चित्रविभ्रमा नानाविकल्पाः प्रवृत्तयो भवन्ति। यत एवं ततस्तस्मात् योगी त्यजेत् कम्। संसर्गं संबन्धम् । कैः सह । जनैः ॥७२॥

ग्रामोऽरण्यमिति द्वेधा
निवासोऽनात्मदर्शिनाम् ।
दृष्टात्मनां निवासस्तु
विविक्तात्मैव निश्चलः ॥७३॥

तर्हि तैः संसर्गं परित्यज्याटव्यां निवासः कर्तव्य इत्याशङ्कां निराकुर्वन्नाह । ग्राम इति । ग्रामोऽरण्यमित्येवं द्वेधा निवासः स्थानम्। अनात्मदर्शिनामलब्धात्मस्वरूपोपलम्भानाम् । दृष्टात्मनामुपलब्धात्मस्वरूपाणां निवासस्तु विविक्तात्मैव रागादिर-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

हितो विशुद्धात्मैव निश्चलः चित्तव्याकुलतारहितः ॥ ७३ ॥

देहान्तरगतेर्बीजं
देहेऽस्मिन्नात्मभावना ।
बीजं विदेहनिष्पत्ते-
रात्मन्येवात्मभावना ॥७४॥

अनात्मदर्शिनो दृष्टात्मनश्च फलं दर्शयन्नाह । देहेति । देहान्तरे भवान्तरे गतिर्गमनं तस्या बीजं कारणं किम् । आत्मभावना । क । देहेऽस्मिन् । अस्मिन् कर्मवशाद्गृहीते देहे । विदेहनिष्पत्तेर्विदेहस्य सर्वथा देहत्यागस्य निष्पत्तेर्मुक्तिप्राप्तेः पुनर्बीजं स्वात्मन्येवात्मभावना ॥ ७४ ॥

नयत्यात्मानमात्मैव
जन्मनिर्वाणमेव वा ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

गुरुरात्माऽत्मनस्तस्मा-
न्नान्योऽस्ति परमार्थतः ॥७५॥

तर्हि मुक्तिप्राप्तेर्हेतुः कश्चिद्गुरुर्भविष्यतीति वदन्तं प्रत्याह । नयतीति । जन्म संसारं नयति प्रापयति । कम् । आत्मानम् । कोऽसौ । आत्मैव । देहादौ दृढात्मभावनावशात् । निर्वाणमेव वा आत्मानमात्मैव नयति । स्वात्मन्येवात्मबुद्धिप्रकर्षसद्भावात् । यत एवं तस्मात् परमार्थतो गुरुरात्माऽऽत्मनः । नान्यो गुरुरस्ति परमार्थतो व्यवहारेण तु यदि भवति तदा भवतु ॥७५॥

दृढात्मबुद्धिर्देहादा-
वुत्पश्यन्नाशमात्मनः ।
मित्रादिभिर्वियोगं च
बिभेति मरणाद्भृशम् ॥७६॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

देहे स्वबुद्धिर्मरणोपनिपाते किं करोती-
त्याह। दृढेति। देहादौ दृढात्मबुद्धिः अवि-
चलात्मबुद्धिर्बहिरात्मा उत्पश्यन् अवलो-
कयन्नात्मनो नाशं मरणं मित्रादिभि-
र्वियोगं च मम भवतीति बुध्यमानो मर-
णाद्बिभेति भृशमत्यर्थम् ॥७६॥

आत्मन्येवात्मधीरन्यां
शरीरगतिमात्मनः।
मन्यते निर्भयं त्यक्त्वा
वस्त्रं वस्त्रान्तरग्रहम् ॥७७॥

यस्तु स्वात्मन्येवात्मबुद्धिः स मरणोप-
निपाते किं करोतीत्याह। आत्मनीति।
आत्मन्येवात्मस्वरूप एव आत्मधीरन्त-
रात्मा शरीरगतिं शरीरविनाशं शरीरप-
रिणतिं वा बालाद्यवस्थारूपमात्मनोऽन्यां

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भिन्नां भिन्नं यथा भवत्येवं मन्यते । शरीरोत्पादविनाशे आत्मनो विनाशोत्पादौ न मन्यत इत्यर्थः । वस्त्रं त्यक्त्वा वस्त्रान्तरग्रहणमिव ॥७७॥

व्यवहारे सुषुप्तो यः
स जागर्त्यात्मगोचरे ।
जागर्ति व्यवहारेऽस्मि-
न्सुषुप्तश्चात्मगोचरे ॥७८॥

एवं च स एव बुध्यते यो व्यवहारेषु अनादरपरः । यस्तु तत्रादरपरः स न बुध्यत इत्याह । व्यवहार इति । व्यवहारे विकल्पाभिधानलक्षणे प्रवृत्तिनिवृत्त्यादिस्वरूपे वा सुषुप्तोऽप्रयत्नपरो यः स जागर्त्यात्मगोचरे आत्मविषये संवेदनोद्यतो भवति । यस्तु व्यवहारेऽस्मिन्नुक्तप्रकारे जागर्ति स सुषुप्त

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आत्मगोचरे ॥७८॥

आत्मानमन्तरे दृष्ट्वा
दृष्ट्वा देहादिकं बहिः ।
तयोरन्तरविज्ञाना-
दभ्यासादच्युतो भवेत् ॥७९॥

यश्चात्मनो गोचरे जागर्ति स मुक्तिं प्राप्नोतीत्याह । आत्मानमिति । आत्मानमन्तरेऽभ्यन्तरे दृष्ट्वा देहादिकं बहिर्दृष्ट्वा तयोरात्मदेहयोरन्तरविज्ञानात् अच्युतो मुक्तो भवेत् । ततोऽच्युतो भवन्नप्यभ्यासाद्भेदज्ञानभावनातो भवति न पुनर्भेदविज्ञानमात्रात् ॥ ७९ ॥

पूर्वं दृष्टात्मतत्त्वस्य
विभात्युन्मत्तवज्जगत् ।
स्वभ्यस्तात्मधियः पश्चा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

त्काष्ठपाषाणरूपवत् ॥८०॥

यस्य च देहात्मनोर्भेददर्शनं तस्य प्रारब्धयोगावस्थायां निष्पन्नयोगावस्थायां च कीदृशं जगत्प्रतिभासत इत्याह । पूर्वमिति । पूर्वं प्रथमं दृष्टात्मतत्त्वस्य स्वदेहाद्भेदेन प्रतिपन्नात्मस्वरूपस्य प्रारब्धयोगिनो विभात्युन्मत्तवज्जगत् । स्वरूपचिन्तनविकलत्वात् । शुभेतरचेष्टायुक्तमिदं जगन्नानाबाह्यविकल्पैरुपेतमुन्मत्तमिव प्रतिभासते । पश्चान्निष्पन्नयोगावस्थायां स्वभ्यस्तात्मधियः सुष्ठु भावितात्मस्वरूपं यस्य निश्चलमात्मस्वरूपमनुभवतो जगद्विषयचिन्ताभावात् काष्ठपाषाणरूपवत्तत्प्रतिभाति परमौदासीन्यावलम्बनात् ॥ ८० ॥

शृण्वन्नप्यन्यतः कामं
वदन्नपि कलेवरात् ।

नात्मानं भावयेद्भिन्नं
यावत्तावन्न मोक्षभाक् ॥८१॥

ननु स्वभ्यस्तात्मधिय इति व्यर्थम्। शरीराद्भेदेनात्मनस्तत्स्वरूपविदः श्रवणात्स्वयं चान्येषां तत्स्वरूपप्रतिपादनान्मुक्तिर्भविष्यतीत्याशङ्क्याह । शृण्वन्निति । अन्यत उपाध्यायादेः काममत्यर्थं शृण्वन्नपि कलेवराद्भिन्नं व्याकर्णयन्नपि । ततो भिन्नं तं स्वयमन्यान्प्रतिवदन्नपपि। यावत्कलेवराद्भिन्नमात्मानं न भावयेत् तावन्न मोक्षभाक् मोक्षभाजनं तावन्न भवेत् ॥ ८१ ॥

तथैव भावयेद्देहाद्
व्यावृत्त्यात्मानमात्मनि ।
यथा न पुनरात्मानं
देहे स्वप्नेऽपि योजयेत्॥८२॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

आत्मतद्भावनायां च प्रवृत्तोऽसौ किं कुर्यात्। तथेति। देहाद्व्यावृत्त्य शरीरात्पृथक्कृत्वा। आत्मानं स्वस्वरूपमात्मनि स्थितं तथैव भावयेत्। शरीराद्भेदेन दृढतरभेदभावनाप्रकारेण भावयेत्। यथा पुनः स्वप्ने स्वप्नावस्थायां देह उपलब्धेऽपि तत्रात्मानं न योजयेत् देहमात्मतया नाध्यवस्येत्।८२।

अपुण्यमव्रतैः पुण्यं
व्रतैर्मोक्षस्तयोर्व्ययः।
अव्रतानीव मोक्षार्थी
व्रतान्यपि ततस्त्यजेत् ॥८३॥

यथा च परमौदासीन्यावस्थायां स्वपरविकल्पस्त्याज्यस्तथा व्रतविकल्पोऽपि यतोऽपुण्यमिति। अपुण्यमधर्मः अव्रतैः हिंसादिविकल्पैः परिणतस्य भवति।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पुण्यं धर्मो व्रतः हिंसादिविरतिविकल्पैः परिणतस्य भवति । मोक्षः पुनस्तयोः पुण्यापुण्ययोर्व्ययो विनाशो मोक्षः । यथैव हि लोहशृङ्खला बन्धहेतुस्तथा सुवर्णशृङ्खलापि अतो यथोभयशृङ्खलाभावाद्व्यवहारे मुक्तिस्तथा परमार्थेऽपीति । ततस्तस्मान्मोक्षार्थी अव्रतानीव । इव शब्दो यथार्थे । यथा अव्रतानि त्यजेत्तथा व्रतान्यपि ॥ ८३ ॥

अव्रतानि परित्यज्य
व्रतेषु परिनिष्ठितः ।
त्यजेत्तान्यपि संप्राप्य
परमं पदमात्मनः ॥ ८४ ॥

कथं तानि त्यजेदिति तेषां त्यागक्रमं दर्शयन्नाह । अव्रतानीति । अव्रतानि हिंसा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

दीनि प्रथमतः परित्यज्य व्रतेषु परिनिष्ठितो भवेत् । पश्चात्तान्यपि त्यजेत् । किं कृत्वा । संप्राप्य । किं तत् । परमं पदं परमवीतरागतालक्षणं क्षीणकषायगुणस्थानम् । कस्य तत्पदं । आत्मनः ॥ ८४ ॥

यदन्तर्जल्पसंपृक्त-
मुत्प्रेक्षाजालमात्मनः
मूलं दुःखस्य तन्नाशे
शिष्टमिष्टं परं पदम् ॥८५॥

कुतोऽव्रतविकल्पत्यागे परमपदप्राप्तिरित्याह । यदिति । यदुत्प्रेक्षाजालं चिन्ताजालम् । कथंभूतम् । अन्तर्जल्पसंपृक्तमन्तर्वचनव्यापारोपेतमात्मनो दुःखस्य मूलं कारणं तत् । तन्नाशे तस्योत्प्रेक्षाजालस्य विनाशे इष्टमभिलषितं यत्पदं तत् शिष्टं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रतिपादितम् ॥ ८५ ॥

अव्रती व्रतमादाय
व्रती ज्ञानपरायणः ।
परात्मज्ञानसंपन्नः
स्वयमेव परो भवेत् ॥८६॥

तस्य चोत्प्रेक्षाजालस्य नाशं कुर्वाणोऽनेन क्रमेण कुर्यादित्याह । अव्रतीति । अव्रतित्वावस्थाभाविविकल्पजालं व्रतमादायविनाशयेत् । व्रतित्वावस्थाभावि पुनर्विकल्पजालं ज्ञानपरायणो ज्ञानभावनानिष्ठो भूत्वा परमवीतरागतावस्थायां विनाशयेत् । पश्चात्स योगी जिनावस्थायां परात्मज्ञानसंपन्नः परं सकलज्ञानेभ्य उत्कृष्टं तच्च तदात्मज्ञानं च केवलज्ञानं तेन संपन्नो युक्तः स्वयमेव गुर्वाद्युपदेशा-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

नपेक्षः परः सिद्धस्वरूपः परमात्मा भवे-
त् ॥ ८६ ॥

लिङ्गं देहाश्रितं दृष्टं
देह एवात्मनो भवः ।
न मुच्यन्ते भवात्तस्मा
त्ते ये लिङ्गकृताग्रहाः ॥८७॥

यथा च व्रतविकल्पो मुक्तेर्हेतुर्न भवति तथा लिङ्गविकल्पोऽपीत्याह । लिङ्गमिति । लिङ्गं जटाधारणनग्नत्वादिदेहाश्रितं दृष्टं शरीरधर्मतया प्रतिपन्नम् । देह एवात्मनो भवः संसारो यत एव तस्माद्ये लिङ्गकृताग्रहा लिङ्गमेव मुक्तेर्हेतुरिति कृताभिनिवेशास्ते न मुच्यन्ते । कस्मात् । भवात् ॥८७॥

जातिर्देहाश्रिता दृष्टा
देह एवात्मनो भवः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

न मुच्यन्ते भवात्तस्मा
त्तेये जातिकृताग्रहाः ॥८८॥

येऽपि वर्णानां ब्राह्मणो गुरुरतः स एव परमपदयोग्य इति वदन्ति तेऽपि न मुक्तियोग्या इत्याह। जातिरिति। जातिर्ब्राह्मणादिदेहाश्रितेत्यादि सुगमम् ॥ ८८ ॥

जातिलिङ्गविकल्पेन
येषां च समयाग्रहः।
तेऽपि न प्राप्नुवन्त्येव
परमं पदमात्मनः॥ ८९ ॥

तर्हि ब्राह्मणादिजातिविशिष्टो निर्वाणादिदीक्षया दीक्षितो मुक्तिं प्राप्नोतीति वदन्तं प्रत्याह। जातीति। जातिलिङ्गरूपविकल्पो भेदस्तेन येषां शैवादीनां समयाग्रह आगमानुबन्धः। उत्तमजातिवि-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

शिष्टं हि लिङ्गं मुक्तिहेतुरित्यागमे प्रतिपादितमतस्तावन्मात्रेणैव मुक्तिरित्येवंरूपो येषामागमाग्निनिवेशः । तेऽपि न प्राप्नुवन्त्येव परमं पदमात्मनः ॥ ७९ ॥

यत्त्यागाय निवर्तन्ते
भोगेभ्यो यदवाप्तये ।
प्रीतिं तत्रैव कुर्वन्ति
द्वेषमन्यत्र मोहिनः ॥ ९० ॥

तत्पदप्राप्त्यर्थं जात्यादिविशिष्टे शरीरे निर्ममत्वसिद्ध्यर्थं भोगेभ्यो व्यावृत्त्यापि पुनर्मोहवशाच्छरीर एवानुबन्धं प्रकुर्वन्तीत्याह । यदिति । यस्य शरीरस्य त्यागाय निर्ममत्वाय भोगेभ्यः स्रग्वनितादिभ्यो निवर्तन्ते । तथा यदवाप्तये यस्य परमवीतरागत्वस्यावाप्तये प्राप्तिनिमित्तं भोगेभ्यो नि-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

वर्तन्ते। प्रीतिमनुबन्धं तत्रैव शरीर एव कु-
र्वन्ति द्वेषं पुनरन्यत्र परमवीतरागत्वे। के।
ते मोहिनः मोहवन्तः॥ ९० ॥

अनन्तरज्ञः सन्धत्ते
दृष्टिं पङ्गोर्यथान्धके।
संयोगाद्दृष्टिमङ्गेऽपि
सन्धत्ते तद्वदात्मनः ॥९१॥

तेषां देहे दर्शनव्यापारविपर्यासं दर्शय-
न्नाह। अनन्तरेति। अनन्तरज्ञोऽन्नेदाग्राहकः
पुरुषः यथा पङ्गोर्दृष्टिमन्धके संधत्ते आरोप-
यति। कस्मात्। संयोगात्। पङ्ग्वन्धयोः सं-
बन्धमाश्रित्य। तद्वत् तथा देहात्मनोः संयो
गादात्मनो दृष्टिमङ्गेऽपि सन्धत्ते। अङ्गं पश्य-
तीति मोहान्निभूतो बहिरात्मा॥ ९१ ॥

दृष्टभेदो यथा दृष्टिं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पङ्गोरन्धे न योजयेत् ।
तथा न योजयेद्देहे
दृष्टात्मा दृष्टिमात्मनः ॥९२॥

अन्तरात्मा किं करोतीत्याह । दृष्टेति । दृष्टभेदः पङ्ग्वन्धयोः प्रतिपन्नभेदः पुरुषः यथा पङ्गोर्दृष्टिमन्धे न योजयेत् तथात्मनो दृष्टिं देहे न योजयेत् । कोऽसौ । दृष्टात्मा देहाभेदेनप्रतिपन्नात्मा ॥ ९२ ॥

सुप्तोन्मत्ताद्यवस्थैव
विभ्रमोऽनात्मदर्शिनाम् ।
विभ्रमोऽक्षीणदोषस्य
सर्वावस्थात्मदर्शिनः ॥९३ ॥

बहिरन्तरात्मनोः कावस्था भ्रान्तिः का वाभ्रान्तिरित्याह । सुप्तेति । सुप्तोन्मत्ताद्यवस्थैव विभ्रमः प्रतिभासते । केषां अनात्म-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

दर्शिनां । यथावदात्मस्वरूपपरिज्ञानरहिता-
नां बहिरात्मनाम्। आत्मदर्शिनोऽन्तरात्मनः
पुनरक्षीणदोषस्य मोहाक्रान्तस्य बहिरात्म-
नः सम्बन्धिन्यः सर्वावस्थाः सुप्तोन्मत्ताद्य-
वस्थावत् जाग्रत्प्रबुद्धानुन्मत्ताद्यवस्था अपि
विभ्रमः प्रतिभासन्ते । यथावद्वस्तुप्रतिभा-
साभावात् । अथवा सुप्तोन्मत्ताद्यवस्थैव ।
एवकारोऽपिशब्दार्थे । तेन सुप्तोन्मत्ताद्यव-
स्थापि न विभ्रमः । केषाम् । आत्मदर्शि-
नाम् । दृढतराभ्यासात्तदवस्थायामप्यात्म-
नि तेषामविपर्यासात् स्वरूपसंवित्तिवैकल्या-
सम्भवाच्च । यदि सुप्ताद्यवस्थायामप्यात्मद-
र्शनं स्यात्तदा जाग्रदवस्थावत्तत्राप्यात्मनः
कथं सुप्तादिव्यपदेश इत्यप्ययुक्तम् । यत-
स्तत्रेन्द्रियाणां स्वविषये निद्रया प्रतिबन्धा-
त्तद्व्यपदेशो न पुनरात्मदर्शनप्रतिबन्धादि-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ति । तर्हि कस्यासौ विभ्रमो भवति । अक्षीणदोषस्य बहिरात्मनः । कथंभूतस्य । सर्वावस्थां बालकुमारादिलक्षणां सुप्तोन्मत्तादिरूपां चात्मेति पश्यतीत्येवंशीलस्य ॥९३॥

विदिताशेषशास्त्रोऽपि
न जाग्रदपि मुच्यते ।
देहात्मदृष्टिर्ज्ञातात्मा
सुप्तोन्मत्तोऽपि मुच्यते ॥९४॥

ननु सर्वावस्थात्मदर्शिनोऽप्यशेषशास्त्रपरिज्ञानान्निद्रारहितस्य मुक्तिर्भविष्यतीति वदन्तं प्रत्याह । विदितेति । न मुच्यते न कर्मरहितो भवति । कोऽसौ । देहात्मदृष्टिर्बहिरात्मा । कथंभूतोऽपि । विदिताशेषशास्त्रोऽपि परिज्ञाताशेषशास्त्रोऽपि । देहात्मदृष्टिः । यतो देहात्मनोर्भेदरुचिरहितस्ततः ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

पुनरपि कथंभूतोऽपि । जाग्रदपि निद्रयाऽनभिभूतोऽपि । यस्तु ज्ञातात्मा परिज्ञातात्मस्वरूपः स सुप्तोन्मत्तोऽपि मुच्यते विशिष्टां कर्मनिर्जरां करोति ॥ ए४ ॥

यत्रैवाहितधीः पुंसः
श्रद्धा तत्रैव जायते।
यत्रैव जायते श्रद्धा
चित्तं तत्रैव लीयते ॥ एए ॥

दृढतराभ्यासात्स्वप्नाद्यवस्थायामप्यात्मस्वरूपसंवित्त्यवैकल्यात् कुतस्तदा तदवैकल्यमित्याह । यत्रेति। यत्रैव यस्मिन्नेव विषये आहितधीः दत्तावधानाबुद्धिः । हितधीरितिच पाठः । तत्रात्मनो हितमुपकारस्तत्राहितधीरिति धारकम् । ३ तिबुद्धिः कस्य । पुंसः। श्रद्धा रुचिस्तस्य तत्रै-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

व तस्मिन्नेव विषये जायते। यत्रैव जायते श्रद्धा चित्तं तत्रैव लीयते आसक्तं जवति ए५

यत्रैवाहितधीः पुंसः
श्रद्धा तस्मान्निवर्तते ।
यस्मान्निवर्तते श्रद्धा
कुतश्चित्तस्य तल्लयः ॥ ए६ ॥

क्व पुनर्निषक्तं चित्तं जवति इत्याह । यत्रैवेति। यत्रैव यस्मिन्नेव विषये अनाहितधीः अदत्तावधानाबुद्धिः । यत्रैवाहितधीरिति च पाठः । यत्र अहितधीः अनुपकारकमिति बुद्धिः। कस्य। पुंसः। तस्मात् विषयात् सकाशात् श्रद्धा निवर्तते । यस्मान्निवर्तते श्रद्धा कुतश्चित्तस्य तल्लयः तस्मिन्विषये लय आसक्तिस्तल्लयः। कुतः नैव कुतश्चिदपि ॥ ए६ ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

भिन्नात्मानमुपास्यात्मा
परो भवति तादृशः ।
वर्तिर्दीपंयथोपास्य
भिन्ना भवति तादृशी ॥९७॥

यत्र च चित्तं विलीयते तद्ध्येयं भिन्नमभिन्नं च नवति। तत्र भिन्नात्मनि ध्येये फलमुपदर्शयन्नाह । भिन्नेति । भिन्नात्मानं आराधकात् पृथग्भूतमात्मानं अर्हत्सिद्धरूपमुपास्य आराध्य आत्मा आराधकः पुरुषः परः परमात्मा नवति। तादृशः अर्हत् सिद्धस्वरूपसदृशः । अत्रैवार्थे दृष्टान्तमाह वर्तिरित्यादि । दीपाद्भिन्ना वर्तिर्यथा दीपमुपास्य प्राप्य तादृशी नवति दीपरूपा नवति ॥ ९७ ॥

उपास्यात्मानमेवात्मा

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

जायते परमोऽथवा ।
मथित्वाऽत्मानमात्मैव
जायतेऽग्निर्यथा तरुः ॥९८॥

इदानीमभिन्नात्मोपासने फलमाह । उपास्येति । अथवा आत्मानमेव स्वस्वरूपमेव चिदानन्दमयमुपास्य आत्मा परमः परमात्मा जायते । अमुमेवार्थं दृष्टान्तद्वारेण समर्थयमानः प्राह । मथित्वेत्यादि । यथात्मानमेव मथित्वा घर्षित्वा तरुरात्मा तरुस्तपनस्वभावोऽग्निर्जायते ॥९८॥

इतीदं भावयेन्नित्य-
मवाचागोचरं पदम् ।
स्वत एव तदाप्नोति
यतो नावर्तते पुनः ॥ ९९ ॥

उक्तमर्थमुपसंहृत्य फलमुपदर्शयन्नाह ।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इतीति । इति एवमुक्तप्रकारेण इदं भिन्नमभिन्नं चात्मस्वरूपं भावयेत् ।नित्यं सर्वदा। ततः किं भवति । आप्नोति। किम्। तत्पदम् मोक्षस्थानम्। कथंभूतम्। अवाचागोचरं वचनैरनिर्देश्यम् । कथं तत्प्राप्नोति । स्वत एव आत्मनैव परमार्थतो न पुनर्गुर्वादिबाह्यनिमित्तात् । यतः प्राप्तात्तत्पदात् नावर्तते पुनः संसारे पुनर्न भ्रमति ॥९९॥

अयत्नसाध्यं निर्वाणं
चित्तत्वं भूतजं यदि ।
अन्यथा योगतस्तस्मा
न्नदुःखं योगिनां क्वचित् ।१००।

नन्वात्मनि सिद्धे तस्य तत्पदप्राप्तिः स्यात् । न चासौ तत्त्वचतुष्टयात्मकाच्छरीरात्तत्त्वान्तर्भूतः सिद्ध इति चार्वाकाः। सदैवात्मा

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

मुक्तः सर्वदा स्वरूपोपलम्भसम्भवादिति साङ्ख्याः। तान्प्रत्याह । अयत्नेति । चित्तं चेतनालक्षणं तत्त्वं यदि भूतजं पृथिव्यप्तेजोवायुलक्षणभूतेभ्यो जातं यद्यभ्युपगम्यते तदा अयत्नसाध्यं निर्वाणं यत्नेन तात्पर्येण साध्यं निर्वाणं न भवति। एतच्छरीरपरित्यागेनाविशिष्टावस्थाप्राप्तियोग्यस्यात्मन एव-तन्मते अभानात्। इत्यात्मनो मरणरूपविनाशादुत्तरकालमभावः । साङ्ख्यमते तु भूतजं सहजं भवनभूतं शुद्धमात्मतत्त्वं तत्र जातं तत्स्वरूपसंवेदकत्वेन लब्धात्मलाभम्। एवं विधं चित्तत्वं यदि तदा अयत्नसाध्यं निर्वाणं यत्नेन ध्यानानुष्ठानादिना साध्यं न भवति निर्वाणम्। सदा शुद्धात्मस्वरूपानुभवे सर्वदैवात्मनो निरुपायमुक्तिप्रसिद्धेः। अथवा निष्पन्नेतरयोग्यापेक्षया अयत्नेत्या-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

द्विवचनम्। तत्र निष्पन्नयोग्यापेक्षया चि-
त्तत्वं भूतजं स्वभावजम् । भूतशब्दोऽत्र
स्वभाववाची । मनोवाक्कायेन्द्रियैरविक्षिप्त-
मात्मस्वरूपभूतं तस्मिन् जातम् । तत्स्वरू-
पसंवेदकत्वेन लब्धात्मलाभम्। एवंविधं चि-
त्तत्वं यदि तदा अयत्नसाध्यं निर्वाणम्। त-
थाविधमात्मस्वरूपमनुभवतः कर्मबन्धा-
भावतो निर्वाणस्याप्रयाससिद्धत्वात् । अ-
थान्यथा प्रारब्धयोगापेक्षया भूतजं चित्त-
त्वं न भवति तदा योगतः स्वरूपसंवेदना-
त्मकत्वचित्तवृत्तिनिरोधाभ्यासप्रकर्षान्निर्वा-
णम्। यत एवं तस्मात् क्वचिदप्यवस्था-
विशेषे दुर्धरानुष्ठाने छेदनभेदनादौ वा यो-
गिनां दुःखं न भवति । आनन्दात्मकस्व-
रूपसंविज्ञानात् तेषां तत्प्रभवदुःखसंवेद-
नासंभवात् ॥ १०० ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

रूपप्ने दृष्टे विनष्टेऽपि
न नाशोऽस्ति यथात्मनः ।
तथा जागरदृष्टेऽपि
विपर्यासाविशेषतः ॥१०१॥

नन्वात्मनो मरणरूपविनाशादुत्तरकालभावात् सिद्धेः कथं सर्वदास्तित्वं सिध्येदिति वदन्तं प्रत्याह। स्वप्न इति। स्वप्ने स्वप्नावस्थायां दृष्टे विनष्टेऽपि शरीरादौ आत्मनो यथानाशो नास्ति तथा जागरदृष्टेऽपि जाग्रदवस्थायां दृष्टे विनष्टेऽपि शरीरादावात्मनो नाशो नास्ति। ननु स्वप्नावस्थायां भ्रान्तिवशादात्मनो विनाशः प्रतिभातीति चेत् तदेतदन्यत्रापि समानम्। न खलु शरीरविनाश आत्मनो विनाशं भ्रान्तो मन्यते। तस्मादुभयत्राप्यात्मनो विनाशो-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ऽनुपपन्नो विपर्यासाविशेषात्। यथैव हि स्वप्नावस्थायां विद्यमानेऽप्यात्मनोऽविनाशे विनाशः प्रतिभासत इति विपर्यासस्तथा जाग्रदवस्थायामपि ॥ १०१ ॥

अदुःखभावितज्ञानं
क्षीयते दुःखसंनिधौ ।
तस्माद्यथाबलं दुःखै-
रात्मानं भावयेन्मुनिः ॥१०२॥

नन्वेवं प्रसिद्धस्यानिधनस्यात्मनो मुक्त्यर्थं दुर्द्धरानुष्ठानक्लेशो व्यर्थो ज्ञानभावनामात्रेणैव मुक्तिप्रसिद्धेरित्याशङ्क्याह । अदुःखेति। अदुःखेन कायक्लेशादिकष्टं विना सुकुमारोपक्रमेण भावितमेकाग्रतया पुनः पुनः चेतसि सञ्चिन्तितं ज्ञानं शरीरादिभ्यो भेदेनात्मस्वरूपपरिज्ञानं क्षीयते अपकृष्य-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ते। कस्मिन्। दुःखसंनिधौ। दुःखोपनिपाते सति। यत एवं तस्मात्कारणात् यथाबलं स्वशक्त्यनतिक्रमेण मुनिर्योगी आत्मानं दुःखैर्भावयेत् कायक्लेशादिकष्टैः सहात्मस्वरूपं भावयेत्। कष्टसहो भवन्नात्मस्वरूपं चिन्तयेदित्यर्थः ॥ १०२ ॥

प्रयत्नादात्मनोवायु-
रिच्छाद्वेषप्रवर्तितात्।
वायोः शरीरयन्त्राणि
वर्तन्ते स्वेषु कर्म्मसु ॥१०३॥

ननु यद्यात्मा शरीरात् सर्वथा भिन्नस्तदा कथमात्मनि चलति नियमेन स चलेत् तिष्ठति तिष्ठेदिति वदन्तं प्रत्याह। प्रयत्नादिति। आत्मनः सम्बन्धिनः प्रयत्नाद्वायुः शरीरे समुच्चलति। कथंभूतात् प्रयत्नात्।

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

इच्छाद्वेषप्रवर्तितात् रागद्वेषाभ्यां जनितात्। तत्र समुत्पन्नितात्त्व वायोः शरीरयन्त्राणि शरीराण्येव यन्त्राणि शरीरयन्त्राणि। किं पुनः शरीरिणां यन्त्रैः साधर्म्यं यतस्तानि यन्त्राणीत्युच्यन्त इति चेदुच्यते। यथा यन्त्राणि काष्ठादिविनिर्मितासिंहव्याघ्रादीनि स्वसाध्यविविधक्रियायां परप्रेरितानि प्रवर्तन्ते। तथा शरीराण्यपीत्युभयोस्तुल्यता। तानि शरीरयन्त्राणि वायोः सकाशाद्वर्तन्ते। केषु। कर्मसु क्रियासु। कथंभूतेषु। स्वेषु स्वसाध्येषु॥ १०३ ॥

तान्यात्मनि समारोप्य
साक्षाण्यास्तेसुखं जडः।
त्यक्तारोपं पुनर्विद्वा-
न्प्राप्नोति परमं पदम् ॥१०४॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

तेषां शरीरयन्त्राणामात्मन्यारोपणाव-रोपणौ कृत्वा जडविवेकिनौ किं कुरुतइ-त्याह । तानीति । तानि शरीरयन्त्राणि साक्षाणि इन्द्रियसहितानि आत्मनि समा-रोप्य । गौरोऽहं सुलोचनोऽहमित्याद्यनेक-रूपतया आत्मनि अध्यारोप्य जडो बहि-रात्मा असुखं सुखं वा यथा भवत्येवमा-स्ते । विद्वान् अन्तरात्मा पुनः प्राप्नोति । किं तत् । परमं पदं मोक्षम् । किं कृत्वा । त्यक्त्वा । कम् आरोपम् ॥ १०४ ॥

मुक्त्वा परत्र परबुद्धिमहंधियं च
संसारदुःखजननीं जननाद्विमुक्तः ।
ज्योतिर्मयं सुखमुपैति परात्मनिष्ठ
स्तन्मार्गमेतदधिगम्य समाधितन्त्रम्

शरीरादीनामात्मन्यन्नेदाध्यवसायं कथं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

त्यजति इत्याह । मुक्तेति । अथवा स्वकृतग्रंन्थार्थमुपसंहृत्य फलमुपदर्शयन् मुक्तेत्याद्याह । उपैति प्राप्नोति । किं तत् । सुखम् । कथंभूतम् । ज्योतिर्म्मयं ज्ञानात्मकम् । किंविशिष्टः सन्नसौ तदुपैति । जननाद्विमुक्तः संसाराद्विशेषेण मुक्तः । ततो मुक्तोऽप्यसौ कथम्भूतः सम्भवति । परमात्मनिष्ठः परमात्मस्वरूपसंवेदकः । किं कृत्वाऽसौ तन्निष्ठः स्यात् । मुक्त्वा । काम् । परमात्मबुद्धिम् । अहंधियं च स्वात्मबुद्धिं च । क । परत्र शरीरादौ । कथंभूतां ताम् । संसारदुःखजननीं चातुर्गतिकदुःखोत्पत्तिहेतुभूताम् । यतस्तथाभूतां तां ततस्त्यजेत् । किं कृत्वा । अधिगम्य । किं तत् । समाधितन्त्रम् । समाधिः परमात्मस्वरूपसंवेदनैकाग्रतायाः परमोदासीनताया वा तन्त्रं

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

प्रतिपादकं शास्त्रम् । कथंभूतं तत् । तन्मार्गं तस्य ज्योतिर्मयसुखस्य मार्गमुपायमिति ॥ १०५ ॥

येनात्मा बहिरन्तरुत्तमभिदात्रेधा विवृत्त्योदितो
मोक्षानन्तचतुष्टयामलवपुः सद्ध्यानतः कीर्तितः ।
जीयात्सोऽत्र जिनः समस्तविषयः श्रीपादपूज्योऽमलो
भव्यानन्दकरः समाधिशतकृच्छ्रीमत्प्रभेन्दुप्रभुः ॥

॥ इति सम्पूर्णमिदं समाधिशतकम् ॥

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# शुद्धिपत्रम्.

| पत्रम् | पंङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १ | ३ | वुध्यतात्मैव | बुध्यतात्मैव |
| १६ | ११ | विश्रमः | विभ्रमः |
| १७ | १० | मेब | मेव |
| २३ | १० | तदाचेत- | तदचेत- |
| २६ | १३ | पुरुप | पुरुष |
| ३० | ९ | कथंभतं | कथंभूतं |
| ५६ | ९ | संधते | संधत्ते |
| ५९ | ३ | संक्लिष्टृ- | संक्लिष्टू- |
| ६२ | १४ | नन्निभृत- | नन्निभूत- |
| ७० | १४ | भेदाध्यव- सास्तया | भेदाध्यवसा- यस्त |
| ७२ | ८ | वाकृतः | वाकृततः |
| ७३ | १० | परित्यज्या- टव्या | परित्यज्या- टव्यां |

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| ७६ | ९ | त्यत्का | त्यक्त्वा |
| ७७ | ३ | | |
| ९२ | १४ | ।३ | ३. |
| ९६ | १० | चित्तत्वं | चित्तत्वं |
| ९७ | १२ | | |
| ९८ | २ | त्तत्वंन्नृ | त्तत्वंन्नू |
| ” | ९ | न्नृतजं | न्नूतजं |
| ९९ | ६ | सिध्येदि | सिद्ध्येदि |
| १०३ | १२ | जननी | जननीं |
| १०४ | १ | मुक्तेति | मुक्त्केति |
| ” | २ | | |
| १९ | १० | आत्मविया | आत्मधिया |
| ४२ | १२ | प्रजायते | प्रजायेते |
| ४४ | ६ | आत्मविभ्रजं | आत्मविभ्रमजं |
| ५६ | ३ | न्नवेदात्म | न्नवेदात्म |
| ५९ | १ | सती | सति |
| ६३ | १२ | कम्म् | काम्म् |

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# THE SAMADHI-S'ATAKA

OF

## Prabhendu

With commentary by Prabhâchandra.

TRANSLATED INTO ENGLISH, WITH NOTES

by

MANILAL N. DVIVEDI, B. A.,
SOMETIME PROFFESSOR OF SANSKRIT, BHAVNAGAR;
SUPERINTENDENT, SANSKRIT RESEARCH, BARODA.

*Published by*
GIRDHARLAL HIRABHAI.

AHMEDABAD : UNION PRESS.

**V. S 1951. A.D. 1895**

*(All rights reserved)*

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# PREFACE.

I translated the Samâdhi-S'ataka of the Jaina Sâdhu Prabhendu in the Gujarati Language, as part of my work in connection with the Pattan Jaina Bhandâras, organized by the enlightened educational policy of His Highness Mahârâjâ Sayâjirao Gaekwad G C. S. I., of Baroda. Mr. Girdharlal Hirabhai, an enlightened member of the Jaina community and a lover of Jaina literature, requested me, on seeing the Gujarati translation of the Samâdhi-S'ataka, to translate it into English and arrange for the publication of the original Sanskrit text with the Sanskrit commentary of Prabhâchandra. I glady undertook the work, and allowed Mr. Girdharlal the copy-right of this first edition of five hundred copies. I believe the book will be interesting to all readers, more for the breadth of view it presents and the almost universal advice it gives, than for its purely sectarian character. Upâdhyâya Jasovijaya has rendered this work in some sort of old Gujarati verse, and his rendering wlll be found in the Prakarana-Ratnâkara which also contains a useful treatise called Samatâ S'ataka on the subject

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

of *Râja-Yoga.* Jasovijaya describes the *Samâdhi-S'ataka* as *Samâdhi-Tantra* which would appear to be only another name of this book as seen in the verse at the end. I have not been successful in ascertaining the period or life of the author or the commentator.

*Baroda,*
*30th March 1895.*

M. N. DVIVEDI.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

# THE SAMÂDHI-S'ATAKA

*(Hundred verses on self-concentration)*

**1.** That *Siddhàtman* who has realized Self as Self, and everything else as apart from Self, who possesses knowledge unfailing and unconditioned,—to Him I bow.

**2.** That *Jina* the glory of whose unexpressed speech stands supreme above all, who is the founder of a School of Philosophy ( *Tirtha* ) though never wishing to found one, who is all bliss, who is the Saviour of all, who is full of right knowledge, the ken of whose all-knowing eye comprehends everything, who takes on a body ( at pleasure)—to Him I bow.

**3.** I proceed to explain, as far as it lies in my power, the form of pure *âtman*, as it is described in the scriptures, as I find it proved by inference and as I understand it in

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

moments when my mind is held in complete tranquility.×

4. *Âtman* (soul) as it is found in all being is of three kinds: objective, subjective, and supreme. Try to realize the third and forget the first, by means of the second.

---

× These three verses are, as it were, a kind of in-introduction to the book that follows. *Siddhâtman* is that supremely accomplished soul who is free from all kinds of *karma*, causes which hinder onward progress. To know the soul as soul, and separate everything else from it as non-soul is the only real means of final liberation in this philosophy, whence this idea is hinted at in the very first verse. In describing the *Siddhâtman* as one having unfailing and unconditioned knowledge the obvious hint is at the power consequent upon liberation, and therefore at the true condition of the liberated. The word *Jina* means a conqueror, the conqueror of all passions etc., the highest Adept. Every liberated soul is a *Jina* and this philosophy derives its name from its being founded by the *Jina*. The word *tirtha* means a holy place which by its holiness helps the wicked to be free from this dross of this world. This philosophy is a *tirtha* of this kind, and the founders of it are therefore called *tirthakaras*. The speech of the *Jina* is supreme though unexpressed because it is understood by all, beasts, birds, men, and gods, at the same moment. The object of this treatise is the unfolding the form of the pure self;–pure because free from all dross of *karma*, and therefore liberated.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

5. The objective soul considers the body and its accompaniments to be his self, the subjective soul binds himself to the mind and its affections, whereas the supreme soul stands ever free and entirely pure.*

6. (The supreme soul is called) *Nirmala* (free), *Kevala* (all alone), *S'uddha* (supremly pure), *Vivikta* (unconditioned), *Prabhu* (the Lord), *Avyaya* (Eternal), *Parameshthi* (the Great Lord), *Parátmâ* (supreme soul), *Paramátmà* (supreme *àtman*) *Is'vara* (the great God), *Jina* (the Conqueror).×

7. The objective soul, ever removed from true knowledge of *àtman*, inasmuch as he finds himself going out to objects through the physical senses, supposes his body to be his real self.

---

* That is to say free from all the dross put upon it by *karma*.

× 'Free' from the dross of *karma*; 'all alone' because not related with body etc.; 'supremly pure' because ahove *dravya, bhâva, karma*; 'unconditioned' because not conditioned by any actions; 'eternal' because ever in full enjoyment of the four infinites (*anantachatushtaya*).

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**8-9.** The ignorant thinks the soul encased in the body of a man to be a man, in that of a bird to be a bird, in that of a god to be a god, in that of an inhabitant of the infernal regions to be one belonging to the infernal regions. The soul, however, never of itself,× becomes any of these, for, his intelligence and power are infinite, he is capable of being known only to himself, and remains eternally unaffected.

**10.** The ignorant argues from his body to the body of others, and though occupied by the supreme soul, regards that dead mass alone as the real soul of the man.

**11.** Thus. these, not knowing the real soul, from reasonings like these, become still further deluded in regarding different bodies as child, wife, and so on.

**12.** In this wise is engendered and nourished the latent power called *avidyâ*, by the force

× "Of itself" *i. e.* the soul never takes on any form, is never affected by anything; it is only the form of conditions imposed by *karma* that present it in the variety of forms described.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

whereof these men continue to regard the body as the soul over and over again.×

**13.** He, taking the body for his real self, thinks the body to be his soul; whereas he who knows the soul to be his real self severs all connection with the body.

**14.** The body, being mistaken for the soul, is taken to be wife, child, and so on; one so deluded thinks himself enriched by these (delusious);—Oh! the world has really been much misled!

**15.** The root of this misery viz., the circle of birth and death is none other than this false knowledge which identifies the body with the soul. Freeing oneself from this delusion, and not allowing the senses to relate themselves to external objects, one should concentrate himself within (that is to say should try to realize the subjective soul).

**16.** Being misled by way of the senses into the objective, like one under the effect of

× That is to say in every birth after death; in future incarnations.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

strong intoxication, I was formerly led to think the objective alone to be my self, and did not really know the true nature of the soul within. ×

17. Thus giving up all thought of the objective, one should give up every idea about the subjective also;—this is the shortest *Yoga*, the light of the Absolute Soul.

18. For, the forms I perceive can never know, that which knows can never be seen in any form; there remains therefore none to whom I can speak.

19. That others should prove my self, or [ that I should prove the self of others, is all nothing short of madness, for I am always beyond thought and beyond speech.†

× This is supposed to be the stream of thought in the mind of one who, leaving the objective, has become a subjective soul.

† Verses 18 and 19 explain how and why all thought of the objective as also of the subjective should be given up. Verse 20 explains the real nature of the soul, the real self.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**20.** I am that self-realizable essence which does not take on what belongs not to it, which does not give up what belongs to it by nature, and which knows everything every way. ×

**21.** As one mistaking a post for a man deals with it under that delusion, so did I formerly act under the delusion of mistaking the body for the soul.

**22.** As that man deals with the post on being cured of the delusion, so do I, cured of the delusion of mistaking the body for the soul, deal with the body in the right spirit.

**23.** That soul by which I realized myself in the self, through self, is my real self;—neither masculine, feminine, nor neuter; neither one, two, nor many.

**24.** I am that self-realizable essence, in the absence whereof I was all sleep, in the presence whereof I am all wakefulness,–ever beyond the senses, entirely indescribable.

---

× That which does not belong to the soul is the appearance of passions etc., brought about by *karma*; that which belongs to it is infinite kuowledge etc.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

25. Passion and its brood vanish into nothing, even here (*i. e.* in this life), on my realizing my self, all light, in the proper way; I have henceforward no friend, no foe.

26. The world that sees not my (real) self cannot be my friend or foe, and it cannot be my friend or foe even if it sees my (real) self.

27. Thus giving up the objective, one should centre himself in the subjective, and through it, contemplate steadily on the Absolute, transcanding all thought.

28. One so contemplating attains to the realization of Self, through strong attachment brought about by unbroken concentration on the idea 'I am the (Absolute) Self.'

29. There is no greater ground for fear than the one wherein the fool places his trust, there is no better place of safety than the one whence he turns away in fear.

30. That is the real essence of the Absolute Self which reveals itself, even for a

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

moment, on seeing within with the subjective soul held in perfect calmn, and with the senses all subdued under full control.

**31.** That which is the Absolute Self is myself, and that which is myself is the Absolute Self. It being so, I must devote myself to my self and to none other. This is the truth (in accord with the facts of nature.)

**32.** Having turned away my self, centred in my self, with my self, I have become the Self, all consciousness and supreme bliss.

**33.** He who thus knows not the eternal self as apart from the body, never attains liberation, though he should go through the severest austerities.

**34.** One full of the ecstacy of supreme bliss consequent on realizing the difference of self and not-self (*i. e.* the material body), is never affected, though enjoying out the direst *karma* through (the twelve kinds of) austerities.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**35.** He alone sees the essence of Self, the waters of whose mind stand stil', being ever undisturbed by the waves of love, hate and their likes;—He indeed is himself that Essence. To none else is this possible.

**36.** The mind held in perfect calmn is the essence of Self, whereas the mind distracted hither and thither is the illusion of Self; it is meet therefore to hold the mind steadily in peace, and not to allow it to be distracted on any account.

**37.** The mind overpowered by the force of impressions derived from the constant action of *avidyâ* runs in all directions; it settles into the Essence, of its own accord, through the force of impressions arising from real *knowledge*.

**38.** He feels the force of insult and its likes whose mind is open to disturbance; he whose mind knows no disturbance has nothing to do with insult and the like.

**39.** When through delusion × arise love

× That is to say through the rise of what are called the delusive *karma* (*mohaniya-karmodaya*).

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

and hate in the ascetic, he should, at the very moment, fix his mind on the quiet light of Self, and they are sure to disappear in no time.

**40.** The silent (ascetic) should, with the help of proper discrimanation, tear away the soul from that body whereon he stands attached by love, and fix him-self on that which is yet higher (viz the self) than that. Thus would disappear all such attachment.

**41.** Misery, arising from false knowledge of *àtman*, disappears on being replaced by real knowledge of Self. Those who do not bring themselves to realize the Self will never have extinguished (the fire of misery), though they should pass through the severest penance.

**42.** He who identifies the Self with the body, hankers after a good make and heavenly enjoyments; whereas he who has realized the Self desires freedom from the body.

**43.** The former having fallen away from the self puts his self in the bondage (of *karma*),

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

the latter having fallen away from the body becomes liberated.

**44.** The deluded takes self to have all the three genders he finds in the objective, whereas the enlightened knows it as something indescribable, eternal, and beyond all speech.

**45.** The enlightened, though knowing the essence of Self, and though realizing it in the difference of body and self, experiences delusion at times, through the force of impressions surviving his previous condition. ×

**46.** The objective is all dead matter, the soul is ever invisible; there is no ground, therefore, either for pleasure or displeasure, and I stand entirely neutral in their midst.

**47.** The deluded deals in give and take with the objective, the knower of self deals similarly with the subjective, whereas one settled in the Absolute deals neither with the one nor the other.

× When he was only an objective soul (*Bahirâtmâ*).

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**48.** I dentify self with the mind severing it entirely from speech and body, and cease to direct the mind to intercourse established through speech and body.

**49.** The world is all beautiful and worthy of confidence to those who regard body as *âtman*; where can there be any place of confidence or of beauty to those who know their own self to be the real *âtman*.

**50.** Keep not the mind longer than necessary on any business other than self-knowledge; you may, on occasions, engage yourself in something, through speech and body, taking care not to lose yourself in the act.

**51.** That which is assured me by the senses is not the real light of my self; it shines to my infinite joy when after holding the senses under control I look for it within.

**52.** The beginner finds happiness in the objective and feels much pain in passing into the self; whereas one who has realized the Essence sees misery in the objective and all bliss in the self.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**53.** Direct all speech to that end, inquire of others after that, desire that very thing, devote yourself to that alone, whereby you might put off this coil of *Avidyâ* and find your real form in *Vidyà*.

**54.** He alone regards speech and body as self who is so deluded, whereas the enlightened knows the nature of these as apart one from the other.

**55.** There is nothing in the world of sense which can conduce to the welfare of *àtman*, still the fool continues to play with it, on account of the force of the impressions of ignorance.

**56.** The deluded sleeping long, through the force of ignorance, in conditions naturally undesirable, awake themselves in such state as imagines not-self to be self, leading to intercourse begining with "I" and "me".

**57.** One centred in the essense of *âtman* should look upon his own body, as well as upon that of others, with an eye which understands it all to be *anâtman*.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

58. Fools do not know me till I explain myself to them, but even on explanation there is scant chance of their at all knowing the reality. Hence it is useless to trouble myself about explaining anything to them.

59. I am not that × whom I wish to enlighten, and that which I am can not be grasped by another,† whence there remains nothing which I can explain to others.

60. The deluded, with the internal light all obscured, find satisfaction in the world without; the enlightened feeling no curiosity whatever for external things find supreme peace within.

61. The body knows neither pleasure nor pain; fools, nevertheless, continue to attach all sense of bliss or sorrow to that dead mass.

62. As long as the knower regards the triad body, speech, and mind, as his self, so long does there exist for him the world of

× Viz the body.

† Because *átman* is ever self cognizable.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

experience ; on the conviction of their difference being finally fixed, liberation comes in no time.

**63.** As the self is not supposed to be thickened with the thick cloth ( thrown over the body ), so does the wise not regard his self as in any way affected with the fatness or otherwise of his body.

**64** As on the cloth being worn out people do not think their self affected in any manner, so indeed does the wise not regard his self as affected by the decay of his body.

**65.** As on the cloth being destroyed people do not think the self destroyed in any manner, so does the wise not regard his self as destroyed on the destruction of the body.

**66.** As on the cloth being dyed red you do not think yourself affected in any way, so does the wise not regard his self as affected in any manner on the body being coloured or decorated.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**67.** He, to whom this universe though full of activity appears like a dead mass, without intelligence, without consciousness, without enjoyment, finds supreme non-attachment, consisting in freedom from all relation with the objective; no one else can find such supreme peace.

**68.** The soul with the conscious nature of self obscured by the condition of body, sees not himself, and keeps wandering long, from incarnation to incarnation.

**69.** Atoms come in and go out of the composite mass called body and occupy the same space (with the self). Fools imagine these to be their self, through false identification of body (so impermanent), with the self (always eternal).

**70.** Not qualifying the soul with accidents of the body such as fairness, plumpness, leanness, and the like, one should contemplate upon *âtman*, all eternal consciousness.

**71.** He who thus stands firm in concen-

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

tration finds unfailing liberation; he never gets to it who has no such firmness of mind.

**72.** Contact with men leads to intercourse through speech, which affects the mind, and sets it moving in a thousand fancies. The ascetic should therefore avoid all contact with men, to begin with.

**73.** Town or forest is, however, the abode of those who have not realized the Self, those who have seen the Self abide for ever in the Self, beyond all like and dislike, ever immutable.

**74.** Taking the body for *âtman* is the cause of passing from incarnation to incarnation; whereas knowledge of *àtman* as *àtman* leads to absolute liberation.

**75.** Self leads self to incarnation or final liberation; self is thence the teacher of self; in reality there is no other teacher.

**76.** He who has firm conviction of self in the body, entertains much fear of death,

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

on the approching dissolution of the body, and the consequent separation from friends etc.

**77.** He who knows *ātman* as *ātman* looks upon change of bodily condition as having nothing to do with the Self; and stands as fearless as one exchanging one cloth for another.

**78.** He wakes on the plane of self who sleeps on the plane of experience; he who wakes on the plane of experience sleeps on the plane of self.

**79.** He becomes the Immutable who seeing the self within, and the body and its likes without, acquires firm conviction of their natural opposition.

**80.** To him who has just obtained sight of *ātman*, the world appears as if it were mad or intoxicated; but the realization of *ātman* having ripened into full conviction, he looks upon the world as upon a piece of wood or stone.

**81.** Though hearing it affirmed that

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

*âtman* is different from body, and even though saying the same thing over again, one cannot find liberation till he firmly realizes self as apart from the body.

**82.** Distinguishing *âtman* from the body, *âtman* should so well be seen and realized to be *âtman*, as, not even in dream, should *âtman* again come to be identified with the body.

**83.** Sin comes of disregarding religious forms, holy merit arises from observing them; but liberation consists in entire exhaustion of both one and the other. Hence one desirous of liberation must give up all concern with religious injunctious leading to good as well as evil.

**84.** Give up all that is prohibited in religious books, and be firm in carrying out all that is set forth there as good and virtuous. But having obtained the highest sphere of *âtman* you should give up both one and the other.

**85.** The web of words spoken within in

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

accord with numerous unexpressed thoughts is the root of misery to the self. This being put out, the *residuum* is the highest condition so eagerly desired.

**86.** And these (thoughts) should be done away with by one not observing religious forms, with observance thereof; by one observing them with proper knowledge; thus having attained the highest knowledge he of himself, becomes the highest adept (*Siddha*).

**87.** External signs× are bound to the body, and the body binds the self in the bonds of experience and misery; those who obstinately attach themselves to signs find no liberation from the world of misery.

**88.** Caste too is bound to the body, and the body binds the self in bonds of experience and misery; those who obstinately attach themselves to caste and the like find no liberation from the world of experience and misery.

× Such as wearing cloth of a particular colour, etc.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

89. Those who cling to particular forms of religion × through distinctions such as signs and caste and the like, they too never find the highest sphere of *âtman*.

90. The deluded attach themselves to that very thing* to be free from which they give up enjoyments of every kind, and learn to turn away from that† to attain which they make all the said sacrifice.

91. As, on acconnt of contact, the sight of the lame is attributed to the blind,‡ so the deluded, not understanding the distinction (of body and self), attributes, through contact, the sight of *âtman* to the body.

92. As one who understands the distinction does not attribute the sight of the

× As the religion of the Veda, and the like.

* Viz the body. † Viz *âtman*.

‡ This is the patent example of the lame going upon the shoulder of the blind and guiding his way, used by the Sâṅkhya to indicate the relation of *Purusha* and *Prakṛti* (mind and matter).

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

lame to the blind, so he who has realized *àtman* never attributes the sight of *âtman* to the body.

**93.** Even conditions such as sleep, madness and the like are no cause of delusion to the enlightened, × whereas to that man who, on account of his mind not being cleared of dross, sees every condition as self, all is delusion out and out.

**94** He who identifies body with self never finds liberation though full of all learning and ever awake; whereas he who knows the truth of self is ever liberated, though in sleep or madness.

**95.** Men put faith there where their intellect finds complete satisfaction, and their mind loses itself there where they put entire faith.

---

× The reading in the text *anâtmadars'inâm* must in this case be taken as *nâtmadars'inâm*. This verse admits of two interpretations, and the one given here is preferable to the apparent interpretation inasmuch as following that interpretation we are compelled to violate either grammar or prosody.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

**96.** Faith turns back from that which appears disagreeable to the intellect; how is it possible for the mind to lose itself in that wherein his faith finds no stay?

**97.** Concentrated devotion to the soul as apart from that of the devotee, exhalts him to the high station of the object of devotion; the wick though ever other than the lamp becomes it through force of sheer devotion

**98.** Self becomes the self through devotion to self, the wood acting upon itself turns to fire. ×

**99.** Thus should constantly be kept before the mind, with all devotion, either of these processes; he who does this attains that condition which is beyond speech and whence there is no return (at any time).

**100.** If the conscious element (of our being) were mere result of organization (or

× Two pieces of the *arani*–wood on being violently rubbed together produce fire.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

ever independent and free), × liberation must come without any effort whatever. If not, liberation is realized through concentration. Those who are centred in the self are never affected by any misery or evil.

**101.** The soul is not destroyed with the destruction of all that may be seen in dream; the same applies to waking experience; and even the suggestion that the first is true because it is all delusion, applies equally to the second.

**102.** Contemplation on *gnosis* alone unaccompanied with any suffering, fails, under pressure of calamity or misery; the silent one should, therefore, contemplate upon *àtman* while accustoming himself to sufferings of

---

× This refers to the *chârvâkas* and the *Sânkhyas* respectively. The former regard consciousness (*chit*) as the result of mere organization; the latter regard it as an independent and ever liberated principle in nature, witnessing the action of its co-ordinate, matter. In the one case liberation comes with death, in the other it is not to *come* but always *is*; and either way personal effort has no place.

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

every kind, in proportion to his capacity for such suffering.

**103.** Through the soul's effort, brought about by desire, hate and the like, comes that breath which moves this machine, the body, to accomplish the variety of its acts.

**104.** The fool attributing this activity (of body and the senses) to the soul, feels himself at ease; whereas the enlightened, freeing himself from such delusion, finds the highest condition (of the self).

**105.** One devoted to the Absolute self finds that bliss which is all light, having studied this *Samádhi-Tantra*, the way to that bliss, and being removed from the circle of birth and death, by entirely curing himself of that false identification of self and egoism with the body,–the identification which is the cause of the world of experience.

---

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

*Errata.*

| Page | Line | Incorrect | Ccorrect |
|---|---|---|---|
| 2 | 24 | this | the |
| ,, | 29 | is the unfolding | is unfolding |
| 5 | 10 | delusious | delusions |
| 15 | 22 | Self cognizable | Self-cognizable |
| 7 | 14 | who takes on a body (at pleasure), | who is the sou with body |
| 8 | 11 | transcanding | transcending |
| 9 | 2 | calmn | calm |
| 10 | 6 | | |
| 13 | 1 | I dentify | Identify |
| 14 | 19 | "me" | "mine" |

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org

Jain Educationa International For Personal and Private Use Only www.jainelibrary.org